

# संस्कृत वाणी

## कक्षा ८

54253

SRINIVAS
BOOK DEPOT
TIRUPATI

54253

# संस्कृतवाणी

## [ कक्ष्या-८ ]

लेखक :
शिरोमणि :
श्री वेदाल तिरुवेङ्गडाचार्यः

सम्पादक :
शिरोमणिः
श्री कप्पगन्तुल लक्ष्मणशास्त्री

चित्रकार :
श्री आर्. एस्. शर्मा

RC



आन्ध्र प्रदेश प्रभुत्व प्रकाशनम्
हैदराबाद
१९६७ ई.

SRINIVAS
BOOK DEPOT
TIRUPATI

© Government of Andhra Pradesh, Hyderabad.

*First Published, 1967*

S. V. VIDYA... HALL LIBRARY
54253
TIRUPATI

*All rights whatsoever in this book are strictly reserved and no portion of it may be reproduced by any process for any purpose without the written permission of the copyright owners.*

*Price* : **Rs. 1-25**

PRINTED IN INDIA BY SRI LAXMI ART PRESS,
FOR THE DIRECTOR, A. P. TEXT-BOOK PRESS, HYDERABAD-12.

( Published under the Nationalisation of Text Books Scheme )

# SANSKRIT VANI

## ( VIII Standard )

*Writer :*
Siromani :
**Sri Vedala Thiruvengadacharya**

*Editor :*
Siromoni :
**Sri Kappagantula Lakshmana Sastry,**
( Dy. Director of Higher Education, Govt. of A. P., Hyderabad )

*Published by :*
THE GOVERNMENT OF ANDHRA PRADESH
HYDERABAD

# PREFACE

Sanskrit is one of India's most ancient and rich languages. Its teaching in schools in our country varies from school to school. So, there is the necessity of introducing graded vocabulary to the classes. Since Sanskrit language belongs to the whole country, the terms and idioms used in the Readers should, as far as possible, be uniform, because, the same word is used in different meanings in different parts of the country (as a word in sanskrit carries many shades of meaning). For instance, for 'certificate' in Northern India the word 'PRAMANPATRA' is used while in southern parts, the word 'YOGYATAPATRA' is used. Though both the terms are correct, some confusion may arise in the minds of students in the south as the word PRAMANA is used for 'promise' in that part of the country. In this Reader, efforts have been made to bring about a uniformity of terms used in different parts of the country.

Sanskrit is to be learnt for the understanding of its language, as well as for the appreciation of its rich literature. If this purpose is served, the students will be able to express the ideas of great Sanskrit poets through their mother tongue. So, an attempt is made to introduce the vocabulary more in a passive manner, keeping in view, the syllabus. In the excercises active vocabulary also is introduced with some important applied grammatical forms. In the end the frequency list is given.

Teachers are requested to make the lessons easy while teaching and see that the genius of the language is kept in tact. It is hoped that this reader will serve the needs of the language taught in the schools of Andhra Pradesh, in which the whole-hearted cooperation of the Sanskrit teachers will play a decisive role.

# विषयसूची


| पाठः | | पृष्ठम् |
|---|---|---|
| १. | भारतमाता ... ... ... ... | १ |
| २. | पौराणां स्वत्वानि धर्माश्च ... ... ... | ५ |
| ३. | तेनालिरामलिङ्गः ... ... ... | ८ |
| ४. | पण्डित जवाहर् लाल् नेह्रुः ... ... ... | १२ |
| ५. | पञ्चवर्षीय योजना ... ... ... ... | १६ |
| ६. | कालिदासः ... ... ... ... | १९ |
| ७. | जातीयपताका ... ... ... ... | २६ |
| ८. | विहारयात्राः ... ... ... ... | २९ |
| ९. | मतप्रवक्तारः ... ... ... ... | ३३ |
| १०. | झान्सी लक्ष्मीः ... ... ... ... | ३८ |
| ११. | आन्ध्रकवितापितामहः ... ... ... | ४५ |
| १२. | मद्यपाननिषेधः ... ... ... ... | ५१ |
| १३. | नेह्रुपण्डितस्य मरणशासनम् ... ... ... | ५५ |
| १४. | प्रह्लादः ... ... ... ... | ५८ |
| १५. | पत्रलेखनम् ... ... ... ... | ६२ |
| १६. | नीतिश्लोकाः ... ... ... ... | ६५ |
| १७. | सुबन्ताः ... ... ... ... | ६९ |
| १८. | तिङन्ताः ... ... ... ... | ७९ |
| १९. | विशेष शब्दसूची (Frequency List) ... ... | ८१ |

# राष्ट्र-गीतम्

जन – गण – मन – अधिनायक जय हे !
भारत भाग्यविधाता ।

पंजाब – सिन्धु – गुजरात – मराठा,
द्राविड – उत्कळ – वंग,

विन्ध्य – हिमाचल – यमुना – गंगा
उच्चल जलधि – तरंगा,

तव शुभ नामे जागे,
तव शुभ आशिष मागे,

गाहे तव जय गाथा
जन-गण-मंगळदायक जय हे !

भारत भाग्यविधाता !

जय हे ! जय हे ! जय हे !
जय, जय, जय, जय हे !

---

# प्रतिज्ञा

भारतः मम देशः अस्ति । समस्ताः भारतीयाः मम भ्रातरः भगिन्यश्च सन्ति ।

अहं मम देशे प्रेम करोमि । अस्मात् प्राप्ते विशाले विविधेच ज्ञान–भण्डारे मम गर्वः अस्ति ।

अहं सर्वदा स्वदेशस्य तथा अस्य ज्ञान–भण्डारस्य अनुरूपो भवितुं प्रयत्नं करोमि ।

अहं मम मातुः, पितुः, अध्यापकानां, समस्त–गुरुजनानां च आदरं करोमि । प्रतिव्यक्ति नम्रतापूर्वकं व्यवहारं च करोमि ।

अहं मम देशे जनतायां च भक्त्या व्यवहरामि इति शपथं करोमि ।

तेषां शुभे समृद्धौ चैव मम सुखं निहितं अस्ति ।

# १. भारतमाता

"मातृदेवो भव" इति भारतीयानुद्बोधयति श्रुतिः। अतः भारतीयानां सर्वप्रथमं मातृदेवता सम्पूजनीया। वयं खलु भारतीयाः। भारतमाता अस्य देशस्य जननी। अतो वयमादौ भारतमातरमर्हयामः। देशोऽयं भारतः। एष देशः उत्तरस्मिन् पार्श्वे गिरिणा हिमवता, पार्श्वत्रये अम्बुधिना चाऽवृतः। अत एवोर्वीमब्धिरशनेति वदन्ति भारतीयाः। एनं च देशं हिमवान्, विन्ध्यः, गन्धमादनः, पारियात्रः, निषधः, माल्यवान्, हेमकूटः इति सप्त कुलाचलाः दधते। एतेषु सर्वेष्वचलेषु हिमाचलोऽत्यन्तमौन्नत्यं वहति। अतः स नगाधिराजः बभूव। एतैश्च सप्तभिः कुलाचलैः ध्रियमाणेयं भारतभूमिः एषां भूमिधरतां निर्वहति।

कथमेषा भूमिः माता भवतीति विचारयामः। भूमिर्नाम न मृत्तिकामात्रम्। किन्तु प्रजा अपि। एतासां पोषणायाऽवश्यकानि सर्वाणि वस्तूनि भारतमाता सम्पादयति। तानि, "दधि, मधु, पयो, घृतं, धान्यानि, कार्पासं, तिलाः, आढकाः, मुद्गाः, चणकाः, माषाः, गोधूमाः, राजमाषाः, कुलुत्थाः, सुवर्णं, अयः, रजतं, त्रपु, सीसं, गावः, महिषाः, हयाः" इत्यादीनि। वयं खल्वेतैः पदार्थैरनुदिनं पोष्यामहे एव।

माता यथा स्वसंतानं पोषयति तथा खल्वियं भूमिरस्मा
पोषयति । अत एवेमं नीवृतं भारतानां मातेत्याह्वयामः
एनामस्माकं मातरं प्रेम्णा, गौरवेण, कृतज्ञतया च सर्व
सम्भावयेम । एतादृशीं अर्हति सम्भावनां इयं भारतमाते
निरूपितचरमेव ।

किञ्च यथा पुत्राः जननीमाद्रियन्ते तथा सवित्र्या
सुतेषु वात्सल्यं, प्रेम चाऽधत्ते । एवमनुरागेण 'परस्प
भावायन्तः श्रेयः परमवात्स्यथ' इति भगवद्वाणी यथ
आशास्ते तथा वयमपि परस्परं भावयित्वा श्रेयः परमाप्नुमः

साधुषु पुत्रेषु मातृसेवनकर्तव्यमापतति । तस्य
रक्षणं, सङ्कटादिभ्यो विमोचनं च इति अवश्यमेव कर्तव
पुत्राणाम् ।

एवं कालेन भारतमाता दास्यसङ्कटे निपतिता पुत्रा
आकारयामास । 'दादाभाई नौरोजी महाशयः, 'लोकमान्य
बालगङ्गाधरतिलकः,' 'लाला लाजपतिरायः,' 'गोपालकृष्ण
गोखले महाशयः,' 'महात्मा मोहनदास गान्धिः,' 'चित्तरंजन
दासः,' 'कोंडा वेङ्कटप्पार्यः,' 'टंगुटूरु प्रकाशं महानुभाव
इत्यादयः भारतपुत्राः देशस्य स्वातन्त्र्यसंग्रामे कटिबद्धा
अम्बुधाविव प्लुतिमाकर्षुः । तदा लोकमान्यः स्वातन्त्र्य
ममाऽजानसिद्धं स्वत्वं इत्युच्चैर्जुघोष । मोहनदास गान्धिश्च

धर्ममार्गेण अहिंसाऽऽयुधमवलम्बे। वेङ्कटप्पार्यः सत्याऽग्रहे, करनिराकरणे च निष्ठितोऽभवत्। प्रकाशं महाशयश्च शत्रुभ्यः प्रकटमेव वक्षः प्रादर्शयत्। एतादृशैः जितकाशिभिरन्यैश्च इयं भारतमाता व्यूढा बभूव। ततः समरमारचयितुमुद्यता भारतमाता स्वातन्त्र्यशङ्खमुदपूरयत्। प्रत्यर्थिनश्च आंग्लाः आदावुदायुधाः अन्ते निरायुधाश्चाभूवन्। कालिकादेवी महिषमिव दायशस्त्रुं निहत्य भारतमाता विजयशङ्खं दध्मौ। तेन ध्वानेन भारतीयाः सर्वे हर्षमवापुः। तस्याः मातुः विजयफलमेव एतदस्य देशस्य स्वातन्त्र्यम्। तदिदानीमेव आस्वदामहे। ईदृशी चेयं भारतमाता सर्वदाऽस्माकमतिशयभक्तिपूर्विकां सम्भावनामर्हत्येव खलु। एवं भारतमातुर्महिमा गिरामविषय एव विजयते।

अत एव "जननी जन्मभूमिश्च स्वर्गादपि गरीयसी" इति वाल्मीकिवचनं सुसम्पन्नं भवति।

### अभ्यासः

१. प्रश्नाः,

(अ) भारतमाता प्रथममस्माभिः कुतः पूज्यते ?

(आ) नायकाः किमकुर्वन् ?

(इ) देशः भारतमातेति कुतः कथ्यते ?

(ई) मातृ–पुत्रयोः कीदृशः सम्बन्धः भवति ?

२. अधोनिर्दिष्टेषु वाक्येषु रिक्तस्थानानि "एतद्" शब्दस्य रूपैः पूरयत।

(अ) कथं......भूमिः भारतमाता भवति ?

(आ) ........ पोषणाय आवश्यकानि वस्तूनि सम्पादयति ।

(इ) विजयफलमेव .....अस्य देशस्य स्वातन्त्र्यम् ।

३. 'श्रेयः' शब्दं त्रिषु वाक्येषु योजयत ।

४. "अनुदिनम्, श्रेयः, पुत्रान्, प्लुतिम्, विजयशङ्खम्. सम्भावनाम्" एषु उचितं पदं अधोवाक्येषु रिक्तस्थानेषु योजयत ।

(अ) पदार्थैः.........पोष्यामहे ।

(आ) यूयं ........परमवात्स्यथ ।

(इ) निपतिता......आकारयामास ।

(ई) अम्बुधाविव ........अकार्षुः ।

(उ) भारतमाता.........उदपूरयत् ।

(ऊ) भक्तिपूर्विकां ........अर्हत्येव खलु ।

५. स्ववाक्येषु योजयत :– व्यूढा । उदायुधाः । निरायुधाः ।

६. सन्धत्त :– अम्बुधौ + इव ।

भारतमाता + अस्याः ।

अन्यैश्च + इयम् ।

७. स्त्रीलिङ्गे 'एतद्' शब्दं, नपुंसकलिङ्गे 'श्रेयस्' शब्दं च कंठस्थं कुरुत ।

८. पुरुषत्रये रूपाणि लिखत :– दधते, पोष्यामहे, दध्मौ ।

९. चरति (भ्वादिः) चारयति (चुरादिः) अत्र विभेदं जानीत ।

## २. पौराणां स्वत्वानि धर्माश्च

यान् पुरस्कृत्य कस्यचिद्देशस्य प्रशासनं प्रचलति, ते विषयः 'संविधान'मिति व्यवह्रियन्ते । यो यो देशः स्वातन्त्र्यमश्नुते तस्य तस्य देशस्य स्वतन्त्रं संविधानमावश्यकम् । विशेषतः प्रजातन्त्रशासिते देशे । तस्मिन् संविधाने राज्यनीतिः, राज्याङ्गसंस्थानम्, तस्याधिकारः कार्यविवरणं च, शासनावयवानां मिथः संबन्धः, नागरिकाणामधिकाराः, संविधानसंशोधननियमाः इत्यादयो विषयाः वर्तन्ते । स्वातन्त्र्यलाभानन्तरं डा. राजेन्द्रप्रसाद महाशयानामाध्यक्ष्ये काश्चन समितयः स्थापिताः । एताः सर्वाः मिलित्वा एकं संविधानमरचयन् । एतत् संविधानं पञ्चाशदधिकोनविंशतिशततमे खिस्तुशकाब्दे जनवरि मासस्य षड्विंशतितमात् दिनाङ्कात् भारतदेशे वरीवर्ति । व्यक्तित्वविकासं च कर्तुं मानवस्य व्यापारस्वातन्त्र्यमतीवावश्यकम् । व्यापारस्वातन्त्र्ये वर्तमाने केचन अधिकाराः नागरिककर्तव्यनिर्वहणार्थं समुपतिष्ठन्ते । ते अधिकाराः संविधानपरिभाषायां 'मौलिकाधिकाराः' इति कथ्यन्ते । ते सर्वेभ्यः पौरेभ्यः धर्म—जातिनिरपेक्षं प्रदीयन्ते विधानेन । कदाचिदपि तेषां भङ्गः न कार्यः ।

सर्वप्रथमः समानतयाऽधिकारः । न्यायदृष्ट्या सामाजिकदृष्ट्या च सर्वेऽपि समानाः; लिङ्ग-जात्यादिभेदः गौणोऽ

गणनीयश्च इत्युद्घोषयाति संविधानम् । अतोऽस्पृश्यता जनानां महानपराधो गण्यतेऽधुना । प्रभुत्वसेवासु, इतरसामूहिकानुष्ठानेषु च न केनापि तारतम्यमुच्चनीच भावो वा प्रदर्श्येत ।

तथा च स्वतन्त्राधिकारोऽपि वर्तते । एकस्मिन् अधिकरणे (Clause) विचारस्वातन्त्र्यं, तस्य निवेदनं न्यायालये कर्तुं सामर्थ्यं, सम्प्रदायस्वातन्त्र्यं, वृत्तिस्वातन्त्र्यं, उद्यमस्वातन्त्र्यं च अन्तर्भवन्ति । एवञ्च सर्वोऽपि भारतीयः भारतदेशे यथेष्टं विहर्तुं स्थातुं वा शक्नोति । गृहनिर्माणं, कृष्यादिकं च स्वामिरूपेण कर्तुं शक्नोति । प्रदेशसीमानः न बन्धकरा भवेयुः । संविधाने भारतराज्यं मतधर्मनिरपेक्षं इति स्पष्टमेव कथितम् ।

भारतराज्याङ्गदृष्ट्या न कोऽप्यात्मीयः न कोऽपि परः । मतधर्मस्वान्त्र्यं सर्वतः वर्तते । तेन, भारतीयप्रजाः यं कमपि धर्मं स्वेच्छया स्वीकर्तुं पारयेयुः । 'प्रभुत्वमतधर्मः' इति न कोऽपि धर्मः सम्प्रदायविशेषो वा स्यात् । यः कोऽपि जनः स्वमत्यनुसारं विशिष्टसङ्घस्य सांस्कृतिकजीवनं रक्षितुं परिष्कर्तुं वा पूर्णतया स्वतन्त्रः स्यात् ।

नूतनविधानेन प्रतिभारतीयं सम्पदधिकारो दत्तः । तद्वशात् धनं सञ्चेतुं स्ववस्तूनि क्रेतुं विक्रेतुं वा भारतीयः समर्थो भवेत् । यत् धनं पौरेण सम्पाद्यते तस्मिन् स्वामित्व-

मार्जयितुरेव। न कोऽपि तद्विच्छेत्तुं शक्नोति। धर्मस्य अविरोधेनैव वाग्व्यवहारं प्रवर्तयितुमधिकारोऽपि पौरेभ्यो दत्तः। किञ्च, यां काञ्चन वृत्तिमाददातु; यत्किञ्चिन्मतं स्वीकरोतु; यत्र कुत्र वा वसतु पौरः, तं विरोध्दुं निषेध्दुं वा न कश्चनाप्यन्यश्शक्नोति। एतानधिकारान् जनेभ्यः प्रदाय भारतीयप्रभुत्वेन अतीवौदार्यं प्रजाहितनीतिश्च प्रकटिते।

## अभ्यासः

१. अश् धातोः लुङि रूपाण्यावर्तनीयानि।

२. विगृह्णीत :– अ) मौलिकाधिकारः, आ) धर्मजातिनिरपेक्षम्।

३. प्रश्नाः :–

अ) संविधानं नाम किम्? आ) तत्र के के विषयाः अन्तर्भवन्ति? इ) तत् कदा रचितम्? ई) मौलिकाधिकाराः के? उ) ते केभ्यो दीयन्ते? ऊ) स्वतन्त्रताऽधिकारे के के विषयाः अन्तर्भवन्ति?

४. अर्थाः :– अ) संविधानम्=राज्याङ्गविधानम्, आ) राज्याङ्गसंस्थानम्=राज्यकक्ष्यान्तर्गतकार्यालयाः, इ) कार्यविवरणम् = अंशानां स्फुटीकरणम्, ई) शासनावयवाः=प्रभुत्वघटकाः, उ) संविधानसंशोधननियमः=राज्याङ्गविधानांशानां परिवर्तनम्, ऊ) धर्मः=मतम्, ऋ) अधिकरणं=शासनांशः॥

# ३. तेनालि रामलिङ्गः

तेनालि रामलिङ्गः विकटप्रज्ञः । एतस्य 'रामकृष्ण इत्यपि नामान्तरमस्ति । अस्य कृत्यान्यतीव हासमु जनयन्ति । ततस्सन्तुष्टः प्रभुः श्रीकृष्णदेवरा बहुवारममुं बहुना धनेन सम्मानयामास । अतोऽयं धनवानि प्रथा सर्वत्र प्रससार । अनया च जनश्रुत्या आकृष्टाः कतिच तस्कराः कस्यांचन रात्रावस्य गृहं लुण्टितुं निरचिन्वन् सा च रात्रिरागता । किञ्चिदिव व्यतीता च । चोरास्समागताः वार्ताकनिष्कुटे निलीनाश्च ।

रामलिङ्गस्तेषामागमनं सुसूक्ष्मं आदावेवाऽकलयामास रहसि पुत्रेण सह सम्मन्त्र्य प्रकटमेवं जगाद । "पुत्र ग्रामे चोरास्सञ्चरन्तीति शृणुमः । अस्माकं धनं कथं व सुरक्षितं भवेत्" इति । पुत्रः प्रत्यवादीत् – "तात ! सर्वम स्माकं धनं एकस्यां पेटिकायां निधाय कूपे निक्षिपावः । ते चास्मद्धनं सुष्ठु गुप्तं भवेत् । चोराः आगच्छन्तु नाम अलब्ध्वैव धनं रिक्तैरेव हस्तैर्यथाऽऽगतं गच्छेयुः" इति ।

सुतस्य वचनं प्रकटमभ्यनन्दत्पिता । ततश्च पिता- पुत्रौ मञ्जूषामेकामेकान्ते शिलाभिः आपूरयताम् । तस्या भारेण भग्न-भुग्नहस्तौ तामानीय कूपे निपातयामासतुः । ततश्च

54253

पातध्वनिः महानभूत्। शनैश्शनैश्च वाप्यां निमज्जन्तीं तां मञ्जूषां पश्यतः तस्करानाशापाशैस्सा निबबन्ध। अतृप्तनयनैश्चावलोकयताममीषां मनस्येवमस्फुरत्ः "अस्य गृहपतेस्सर्वस्वमिदानीमेव वयमश्रमेण लभेमहि"।

इति हर्षेण तरङ्गशस्तुरङ्गयन्तः करचरणमेवमगायन्ः—

"अनुल्लङ्घ्य भित्तीननारुह्य वप्रान्
अविच्छिद्य सन्धीनदृष्ट्वाऽहिवृश्चैः।
अधृत्वैव शस्त्रं ह्यचित्वैव गेहम्
त्विदं लभ्यते वित्तमद्याश्रमेण ॥"

वर्तितां नाम कूपे नीरमपारम्। किमेतद्दण्यते? इयमस्मत्समितिः वित्तेऽस्मिन् सजूरेव हि। बहवश्च वयं यद्युदञ्चयामः तर्हि जलस्य ह्रास एव भवेत्। अल्प एवान्तरे इयं पेटी निराबाटमस्मन्नयनान्यानन्दयेत्। इमौ च पिता—पुत्रावन्तरेव वर्तेते। नास्ति खलु शङ्का तयोः स्वं स्वं पति। सर्वमिदं द्रविणमब्धौ सुनिक्षिप्तं सुरक्षितं चाभूदिति हि तौ मन्येते।

एवं निश्चित्य ते स्तेनाः प्रहेरम्बूदञ्चयितुमारेभिरे। बहोरपि समयादुदच्यमानमपि तदुदकं न वृद्धिं जहौ। नैव च ह्रासमवाप। इदञ्च चोराणां वारुद्धरणं आदित एवाऽचकलत् रामलिङ्गः। सुतेन सह आगात् नीरवं नीरवर्त्म। वार्ताकवाट्यां वारि सारणीनां द्वारा सुगूढं विभजते स्म। तावुभावपि

कुल्यामार्गान् परिष्कुर्वाणौ वाट्यां वारि प्रसारयामासतुः । जल-मुदञ्चयताञ्च चोराणामक्ष्णोः प्रभातमासीत् । ते खलु तस्कराः उषोमुखमेवापश्यन्, न पेटीमुखम् । व्यरंसुरम्बूद्धरणाद्विपादतः ।

तदवगत्य रामलिङ्गस्तानुच्चैरेवमबोधयत् । "भोः ! भोः ! चोरभ्रातरः ! यदीतोऽपि किञ्चिदधिकं परिश्रमः क्रियेत तर्हि वार्ताकवाट्यामापः सुष्ठु पर्याप्ता भवेयुः । तत् पुनरनु-गृह्णन्तु भवन्तः किञ्चित्" । इति श्रुत्वा चेदमुपस्येव सम्बोधनं ग्रन्थिभेदकाः विश्रान्ताः निर्विण्णाश्च बभूवुः । पठितवन्तश्च पलायनसूक्तम् ।

पश्यत बालकाः ! रामलिङ्गस्य चातुर्यम् । यद्वञ्चि-तुमागताः वञ्चिताः पलायामासुः ।

"बुद्धेर्बलमेव बलं
न हि गणनीयं शरीरबलमत्र ।"

### अभ्यासः

१. स्ववाक्येषु योजयत :–
बहुवारम् । अश्रमेण । सजूः । निराघाटम् ।
उदञ्चनम् । अन्तरेव । कूपः । ह्रासः । सारणी । द्वारा ।

२. व्यतिरेकपदानि लिखत :–
सरसप्रज्ञाः । अनवधानम् । वृद्धिः ।

३. 'इदम्' शब्दस्य रूपैः रिक्तस्थानानि पूरयत :–
१) ......... कृत्यान्यतीव हासमुपजनयन्ति ।
२) अतो......... धनवान् ।
३) सर्वं......द्रविणं अन्धौ सुनिक्षिप्तं सुरक्षितं चाभूदिति हि तौ मन्येते ।

४. शब्दानभ्यस्यत :— आप: । वर्त्म ।

५. पुरुषत्रये रुपाणि कण्ठस्थीकुरुत: :—

१) आकलयामास २) आचकलत् ३) विचिन्वन्तु ।

६. सन्धत्त :—

कृत्यानि + अतीव ।

तत: + सन्तुष्ट: ।

अत: + अयम्

७. विगृह्णीत :— वार्ताकनिष्कुटे । अतृप्तनयनै: । पिता-पुत्री ।

८. प्रश्ना: :—

१) रामलिङ्गं प्रति कीदृशी किवदन्ती अवर्तत ? कुत: ? तस्य नामान्तरं किम् ?

२) कूपे किं पातितम् ?

९. अर्था: — अहिवृश्चै: = सर्पै: वृश्चिकैश्च

उदञ्चनम् = नीरोद्धरणम्

सारणी = अल्पा कुल्या

शङ्का = भयम्


अन्धु: } कूप:
प्रहि: }

१०. बुध्यतौ (श्यन्) बोधतौ च (शप्) लुङमभ्यस्यत ।

# ४. पण्डित जवहर लाल् नेहुः

"स जातो येन जातेन याति वंशः समुन्नतिम्"

भारतीयस्वातन्त्र्यसमरे महारथ इति विख्यात
सर्वेषां भारतीयानां मानसेषु विराजमानः, निखिभुवो लला
भूतः नायकर्षभः, 'पण्डित जवहरलाल् नेहु' महोदयः स्वत



भारतस्य प्रधानामात्यपदे सर्वैरेकमुखेन निर्वाचितः। भारत
रत्नमयं (१८८९) एकोननवत्युत्तराष्टादशशततमे खिस्ताब्दे
'नवम्बर'मासस्य चतुर्दशादिने प्रयागे जनिं लब्धवान्। तस्य
पितृपादाः 'मोतीलाल् नेहु' महोदयाः देशहितैकदृष्टयः

आसन्। ते देशप्रीतिपाठान् बाल्यात्प्रभृत्येव पुत्रं अपाठयन्। स्वदेशे प्राथमिकविद्यामधिगत्य समुन्नतविज्ञानं लब्धुं 'जवहर' पण्डितः विदेशमगच्छत्। तत्र 'केंब्रिज' नगरे उन्नतविद्यामधीत्य 'बेरिस्टर' उपाधिं प्रापत्।

तत्पश्चात् प्रयागनगरं प्रतिनिवृत्य न्यायवादिवृत्तिं स्वीकृतवान्। किन्तु पाश्चात्यविज्ञानेनोपबृंहितप्रभावः नेहरु-महोदयः देशपारतन्त्र्यं सर्वथा निराकर्तुं देशवासिनः ऐक्यसूत्रे ग्रथितुं च 'होमूरूल्' संस्थायाः कार्यवाहपदं बहुतिथं कालं निरवहत्। तस्य जाज्वल्यमानां देशभक्तिं कार्यकौशलञ्च वीक्ष्य गान्धि महात्मानः अतीव सन्तुष्टाः सञ्जाताः। लाहोर कांग्रेस् सभायाः नेहरुमहोदयः अध्यक्षश्च बभूव। तस्यामेव सभायां भारतस्य सम्पूर्णस्वातन्त्र्यनिर्णयस्य दुन्दुभिरुदघुष्यत। तदाप्रभृति 'ब्रिटिष्' शासनोत्सादनाय बहुवारमान्दोलनं कृतम्। बहुवारञ्च कारागृहवासः सोढः। किन्तु, सत्स्वपि विघ्नेषु तस्य कार्यदीक्षा न श्लथीभूता। उक्तं खलु भर्तृहरिणा— "विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः प्रारब्धमुत्तमगुणा न परित्यजन्ति" इति।

तस्य परिश्रमाः सफलीभूताः। गान्धिमहात्मनः नेतृत्वे सम्पन्नया नेहरु, पटेल्, राजेन्द्रप्रसाद् प्रभृतीनां कार्यासक्तया भारतदेशः स्वतन्त्रोऽभवत्। तदा गणतन्त्रं

सर्वत्र व्याप्ताम् । नेहरुमहाशयः भारतदेशस्य प्रथमः प्रधाना
मात्योऽभूत् । तदाऽपि सततोद्यमशीलः देशस्य आर्थिक
विकासार्थं तनु-मनो-धनदान-पूर्वकं प्रचारमकरोत् ।

यथा स्वदेशे तथा विश्वेऽपि शान्तिं स्थापयि
सोऽहोरात्रं प्रायतत । सर्वेष्वपि विदेशेषु 'शान्तिदूत' इ
ख्यातिं लब्धवान् । संयुक्तराष्ट्रसङ्घद्वारा सर्वत्र शान्ति
स्यात्, सर्वेऽपि सुखिनः स्युः, सर्वेऽपि भद्राणि पश्येयुरि
तस्य ध्येयमासीत् । तस्य नीतिस्तटस्थता । स्वातन्त्र्या
युयुत्सुभ्यः इतरदेशीयेभ्यः सर्वात्मना साहाय्यं व्यतरत् ।
'पञ्चशील' नाम्नी तस्य नीतिः सुतरां प्रख्याता ।

स्वदेशे यत्र कुत्रापि तस्य दर्शनार्थं लक्षाधिके
जनसमूहः सोल्लासमागच्छतिस्म । सोऽपि पीडितेषु जने
सहानुभूतिं प्रदर्श्य कृषीवलादिभिः साकं स्वयमेव सम्भाषते
स्म । न स कदाऽपि देशसञ्चारादुद्विग्नः । न वा सन्ततकार्येण
परिश्रान्तः सर्वदा सस्मितमुखेन विदेशवासिभ्यः स्वागतं
व्याहरति स्म । तस्य तितिक्षाबलं अदृष्टपूर्वमेव ।

न केवलं स राजनीतिज्ञः, अपितु ग्रन्थरचयिता च ।
तस्य लेखनं पठनं च अविरतं प्रचलदासीत् । 'विश्वेतिहासः,'
'भारतप्रत्यभिज्ञा' इति च ग्रन्थद्वयं तेन लिखितं सर्वत्र
पठ्यते । नेहरुमहोदयः बालकेष्वतीव स्निह्यति स्म । बालक

अपि तं प्रेम्णा 'चाचा नेहरु' इति आह्वयन्ति स्म। सत्यपि कार्यभारे स बालकान्न कदाऽपि व्यस्मरत्। यद्यपि स दिवङ्गतः तथाऽपि तस्य यशः सर्वत्र अमरं वर्तते।

### अभ्यासः

१. "घुष्, भाष्, स्निह्" धातूनां लङ्रूपाणि अभ्यस्यत।

२. विगृह्णीत :– देकहितकदृष्टिः। प्रधानमन्त्री। अहोरात्रम्।

३. प्रश्नाः :–

अ) नेहरुपण्डितः कुत्र कदा समजनि ?

आ) तस्य विद्याऽभ्यासः कुत्र जातः ?

इ) देशस्य स्वातन्त्र्यसम्पादनार्थं केके मार्गा अनुसृताः ?

ई) तस्य जनप्रियस्वभावमधिकृत्य सङ्ग्रहेण लिखत।

## ५. पञ्चवर्षीय योजना (पञ्चवर्षप्रणालिका)

भारतदेशः राजनैतिकात् पारतन्त्र्यात् विमुक्तः तदाऽस्य विशालस्य देशस्य सर्वाङ्गमधिकारं चालयि आवश्यकता अभवभावि। तदर्थमुपायान् वेष्टुं केचनार्थ शास्त्रविशारदाः प्रमुखनेतारश्च एकत्र समाविविशुः प्रणालीमेकां प्रणिन्युश्च। पञ्च संवत्सरान् यावत्, के विषयेषु व्ययः कर्तव्यः ? तत्र प्राधान्येन किंवा अनुष्ठेयम् ? विविधराज्येभ्यश्च कथं देयमनुदानम् ? इति विस्तरेण पञ्चवर्षीययोजनायां उल्लिखितम्। तद्यथा :— गृहनिर्माणात्पूर्वं कियद्धनमावश्यकम् ? तदुपलब्धं भविष्यति वा न वा ? गृहाऽयामः कियान् स्यात् ? तथा तस्य पर्यावरणं परिसरो वा कथं स्वास्थ्यप्रदः स्यात् ? इति प्रथममेवाऽलोच्यत। पश्चान्मानाचित्रं प्राकल्प्यत। अतो देशनेतृभिः केभ्यः विषयेभ्यः प्रामुख्यं प्रदत्तं पञ्चवार्षिकयोजनायां तत् संक्षेपेण वर्ण्यते।

भारतः कृषिप्रधानो देशः। अयं देशः सस्यश्यामलो भवेच्चेत् सर्वैः समृद्धमन्नं लभ्येत। न कोऽपि बुभुक्षितः वर्तेत। कृषिविकासार्थं पर्याप्तं जलमावश्यकं भवति। अतो विविधनदीनां सेतुबन्धनादिभिः प्रणालीभिश्च जलसेकं कर्तुं

अपि तं प्रेम्णा 'चाचा नेहरु' इति आह्वयन्ति स्म। सत्यपि कार्यभारे स बालकान्न कदाऽपि व्यस्मरत्। यद्यपि स दिवङ्गतः तथाऽपि तस्य यशः सर्वत्र अमरं वर्तते।

## अभ्यासः

१. "घुष्, भाष्, स्निह" धातूनां लङरूपाणि अभ्यस्यत।

२. विगृह्णीत :– देशहितकदृष्टिः। प्रधानमन्त्री। अहोरात्रम्।

३. प्रश्नाः :–

अ) नेहरुपण्डितः कुत्र कदा समजनि ?

आ) तस्य विद्याऽभ्यासः कुत्र जातः ?

इ) देशस्य स्वातन्त्र्यसम्पादनार्थं के के मार्गा अनुसृताः ?

ई) तस्य जनप्रियस्वभावमधिकृत्य सङ्ग्रहेण लिखत।

# ५. पञ्चवर्षीय योजना (पञ्चवर्षप्रणालिका)

भारतदेशः राजनैतिकात् पारतन्त्र्यात् विमुक्तः। तदाऽस्य विशालस्य देशस्य सर्वाङ्गमाधिकारं चालयितुं आवश्यकता अ्वभावि। तदर्थमुपायान वेष्टुं केचनार्थ-शास्त्रविशारदाः प्रमुखनेतारश्च एकत्र समाविविशुः, प्रणालीमेकां प्रणिन्युश्च। पञ्च संवत्सरान् यावत्, केषु विषयेषु व्ययः कर्तव्यः ? तत्र प्राधान्येन किंवा अनुष्ठेयम् ? विविधराज्येभ्यश्च कथं देयमनुदानम् ? इति विस्तरेण पञ्चवर्षीययोजनायां उल्लिखितम्। तद्यथा :– गृहनिर्माणात्पूर्वं कियद्धनमावश्यकम् ? तदुपलब्धं भाविष्यति वा न वा ? गृहाऽयामः कियान् स्यात् ? तथा तस्य पर्यावरणं परिसरो वा कथं स्वास्थ्यप्रदः स्यात् ? इति प्रथममेवाऽलोच्यत। पश्चान्मानाचित्रं प्राकल्प्यत। अतो देशनेतृभिः केभ्यः विषयेभ्यः प्रामुख्यं प्रदत्तं पञ्चवार्षिकयोजनायां तत् संक्षेपेण वर्ण्यते।

भारतः कृषिप्रधानो देशः। अयं देशः सस्यश्यामलो भवेच्चेत् सर्वैः समृद्धमन्नं लभ्येत। न कोऽपि बुभुक्षितः वर्तेत। कृषिविकासार्थं पर्याप्तं जलमावश्यकं भवति। अतो विविधनदीनां सेतुबन्धनादिभिः प्रणालीभिश्च जलसेकं कर्तुं

योजनाऽऽयोगेन निश्चयः कृतः। अधुना च चतुर्थपञ्च-वर्षीययोजनाकाले यथासम्भवं सर्वा कृषियोग्या भूमिरुदक-समृद्धा स्यादिति प्रयत्नः क्रियते।

यथा कृषिविकासार्थे जलमनिवार्यं तथा उद्योग-(परिश्रम) विकासे विद्युच्छक्तिरपि प्राणभूतैव। विना विद्युता परिश्रमपरिकरो न सम्पन्नो भवेत्। वस्तूत्पाने चातीव व्ययो विलम्बश्च स्यात्। जलविद्युद्योजनायाः कार्यनिर्वहणे अस्माकं शासनमतीव जागरूकं वर्तते। 'भाक्रा, नान्गल्, हीराकुड्, नागार्जुनसागर, कोयना' इत्यादयः अनेका याजनाः प्रचालिताः मभुत्वेन। अल्पावकाशेषु ग्रामेष्वपि विद्युत्प्रका-शश्चकास्तीत्यहो साधुवादपात्रमस्माकं प्रभुत्वम्।

यदि प्रजाः रुग्णाः, अज्ञानाश्च स्युः तर्हि देशविकासस्य गतिरतीव मन्थरा भवेत्। अतः प्रजानां संक्षेमार्थं बहुविधाः योजनाः पञ्चवर्ष-प्रणालिकासु निर्दिष्टाः। सर्वप्रथमतया सर्वजनस्वाथ्याय चिकित्सालयाः स्थाप्यन्ते। साङ्क्रामिकरो-गाणामुन्मूलनाय च अनेके भिषजः ग्रामे-ग्रामे वसेयुः, उपतिष्ठेरंश्च रोगिणो निश्शुल्कम्। यथा स्वास्थ्यं तथा जन-शिक्षाऽपि लोककल्याणाय आवश्यकी। ग्रामे-ग्रामे पाठशालाः स्थापयित्वा प्राथमिकाशिक्षा अनिवार्या करणीया स्यात्। ज्ञानदीप्तिप्रसारो यदा भवति तदा अज्ञानतमो विनश्यति।

जनाः सम्यक् नागरिका भवन्ति । सामाजिककर्तव्यानि च
श्रद्धया अनुतिष्ठन्ति । तेन देशस्वातन्त्र्यं सुदृढं भवति ।

हरिजनाः, गिरिजनाश्च अस्मिन् देशे बहुसंख्याकाः वर्तन्ते। तेषामुद्धरणार्थं दृढो यत्नः क्रियतेऽधुना। अतः पञ्चवर्षीय प्रणालिकाः देशस्य सर्वतोमुखामुन्नतिं साधयिष्यन्ति ।

एतावता तिस्रः पञ्चवर्षीययोजनाः सुसम्पन्नाः । अद्य चतुर्थपञ्चवर्षीययोजनायां प्रथमो वर्षः प्रचलति । तत्र मम किं कर्तव्यं देशविकासाय, दारिद्र्यविनाशाय च ? अहं किं कर्तुं पारयेयम् ? इति च समालोचयितव्यं एकैकेन भारतवासिना ।

### अभ्यासः

१. 'पार' धातोः आशीर्लिङ आवर्तनीयः ।

२. विगृह्णीत :- सामाजिककर्तव्यानि । कृषिप्रधानः । उदकसमृद्धा ।

३. प्रश्नाः –
   (अ) देशस्य सर्वाङ्गीणविकासे के के उपायाः अनुसृताः ?
   (आ) का नाम पञ्चवर्षीया योजना ? विवृणुत ।
   (इ) देशस्य नेतृभिः केभ्यः विषयेभ्यः प्राधान्यं दत्तम् ?
   (ई) जलविद्युदुत्पादनार्थं भारतप्रभुत्वेन काः काः योजनाः स्वीकृत्य प्रचाल्यन्ते ?

४. अर्थाः :- पर्यावरणम् = परितः आवरणम् ।
   अनुदानम् = प्रभुत्वदत्तं धनम् ।
   योजना = प्रणालिका
   समुदायव्यापारः = सर्वाङ्गाधिकारः

# ६. कालिदासः

संस्कृत-साहित्य-सागरे कृतावगाहानां विदुषां सुविदितमेवैतत्, यदिदं भरतखण्डं नैके महाकवयः स्वजन्मनाऽलञ्चक्रुरिति। तेषां गणनाप्रसङ्गे कालिदासः कनिष्ठिकामधितिष्ठति। तथा चोक्तम् :—

"पुराकवीनां गणनाप्रसङ्गे
कनिष्ठिकाऽधिष्ठितकालिदासा।
अद्यापि तत्तुल्यकवेरभावात्
अनामिका साऽर्थवती बभूव॥" इति।



कालिदासप्रतिभया प्रसूतानि काव्यानि काव्यप्रपञ्चे प्रथमं स्थानमर्हन्तीत्यत्र न कोऽपि सन्देहः। अत एवायं महाकविः कविकुलगुरुः, "कविकुलशिरोमणिः" इत्यादिकैर्बिरुदैरलङ्क्रियते।

'कालिदासः कस्मिन् काले, कुत्र वा अजायत?' इति निश्चेतुं नाद्यापि सुशकं भवति। तथाऽप्यनेन कृतान्युज्जायिनी-शिप्राऽऽ-

दीनां वर्णनानि तु, 'अयमुज्जयिनीप्रान्ते चिरमुवास' इत्यनुमापयन्ति ।

कालिदासमुद्दिश्यैका 'दन्तकथा' श्रूयते—"अयं कविः पूर्वे वयसि साहित्य—सङ्गीतकलाऽनभिज्ञ आसीत् । तस्य जाया तु 'विद्योत्तमा' नाम्नी विदुषी विराजते स्म । एकस्मिन् वसन्तोत्सवे कालिदासः 'मुसलः किसलायते' इति स्वभार्ययाऽपमानितः गृहान्निरगच्छत् । इतस्ततः पर्यटतस्तस्य कश्चन सिद्धतापसः दृष्टिगोचरं गतः । सोऽस्यावज्ञावृत्तमाकर्ण्य सकरुणहृदयो भूत्व 'सरस्वतीमुपास्व' इति कालिदास-मुपदिदेश । तदनुसारमेव स एकं सरस्वतीमन्दिरमुपेत्य भक्त्या वाग्देवतामुपास्तुमारेभे ।

तदाराधनेन सुप्रसन्ना भारती प्रत्यक्षा समभवत् । दृष्ट्वा च कालिदासस्तां देवीं आपादमस्तकं सद्यःस्फुरितेन कविताविभवेन वर्णयामास । तद्वर्णनमाकर्ण्य सरस्वती रुष्टा सती कालिदासमेवमुवाच :— "मूर्ख ! मनुष्यस्त्रियमिव मां आनखशिखं वर्णितवानासि । किं न जानासि देवतारूपं वर्णयितुम् ? अतस्त्वं शृङ्गारिकः कविर्भव !" इति । अनेन अभिशापेन स कालिदासः प्राधान्येन शृङ्गारिकः कविरासीत्" इति ।

ततो गृहं प्रतिनिवृत्य स कालिदासः "द्वारमनावृत-

कपाटं कुरु" इति पत्नीमाजुहाव। तया च द्वारमुद्घाट्य, "अस्ति कश्चित् वाग्विशेषः ?" इत्यपृच्छ्यत। तं प्रश्नमनुरुध्यैव स कविः, तत्प्रश्नपदेषु 'अस्ति' इति पदमारभ्य "अस्त्युत्तरस्यां दिशि देवताऽऽत्मा" इत्यादिमश्लोकेन 'कुमारसम्भवं' नाम काव्यं निर्ममौ। 'कश्चित्' इति द्वितीयं पदमादौ कृत्वा "कश्चित्कान्ताविरहगुरुणा" इत्यारभ्य 'मेघसन्देश' काव्यं निरमात्। तृतीयेन 'वाक्' इति पदेन 'रघुवंश' काव्यं "वागर्थाविव सम्पृक्तौ" इत्यारभ्य व्यरचयत्।

एवं काव्यत्रयमतिमनोहरं, सरसं, मृदु-मधुरपदगुम्फितं निर्माय कालिदासः, "मालविकाऽग्निमित्रम्, विक्रमोर्वशीयम्, शाकुन्तलम्" इति नाटकत्रयमपि रचयामास। तत्र शाकुन्तलं जगत्प्रसिद्धिं जगाम। "ऋतुसंहारः, शृङ्गारतिलकं" इत्यादयोऽन्येऽपि ग्रन्थाः कालिदासेन ग्रथिता इति केचन, नेति केचन विप्रतिपद्यन्ते।

कुमारसम्भवकाव्ये "शिवयोस्तपस्या, तयोः परस्परं समागमः कार्तिकेयस्य तत्पुत्रत्वेन जननं, तेन लोककण्टकस्य तारकासुरस्य संहारः" इत्यादिकाः विषयाः सुमनोहरं रचिता महाकविना।

मेघसन्देशकाव्यन्तु संस्कृतसाहित्यप्रपञ्चे सर्वोत्तमं काव्यरत्नमिति मन्वते रसिकशिरोमणयः। अस्मिन्काव्ये

स्वाऽज्ञाभङ्गक्रुद्धेन कुबेरेण स्वसेवकाय कस्मैचन यक्षाय शापो दत्तः। तेन च यक्षो भार्यया वियुक्तस्सन् वने विरहोन्मत्तो भ्रमन् कामाऽर्त्या कृपणो भूत्वा धूम-ज्योतिः-सलिल-मरुत्सान्निपातस्वरूपेण मेघेन स्वसन्देशं जायायै प्रेषितवान्। एतावतीमेव कथां कल्पयित्वा स्वप्रतिभामहिम्ना कालिदासः सर्गद्वय-सम्मितामिदं काव्यं निर्माय विश्वसाहित्येऽस्याः खण्डकृतेः अग्रिमं स्थानं प्रादापयत्। "रामायणे आदिकाव्ये वाल्मीकिना आदिकविना कृतं हनूमत्सन्देशं मनसि निधायायं कविकुलगुरुः इदं 'सन्देशकाव्यं' निर्माति स्म" इत्यभियुक्ता मन्यन्ते।

कविकुलतिलकोऽयमादितो रामायणकथां स्वकाव्यवस्तु कृत्वा 'रघुवंश' काव्यं जग्रन्थ। संस्कृतं प्रविविक्षूणां छात्राणामिदमेव काव्यं इदम्प्रथमतया पाठ्यते गुरुभिः। कालिदासकाव्येषु रघुवंशस्य, नाटकेषु च शाकुन्तलस्य अतीव लोकप्रियता विद्यते।

कालिदासस्य नाटककृतिषु 'मालविकाऽग्निमित्रम्' प्रथमनिर्मितामिति रसिका मन्यन्ते। यतोऽत्र, कथावस्तु किञ्चिदिव दुरूहं समनुभूयते। कमनीयता-वैशद्ये अपि कवितारीतौ न तथाऽनुभव पथमवतरतः यथा चान्यास्वस्य कवेः कृतिषु दृश्येते। अत्र नायिका मालविका, नायकः अग्निमित्रः। अस्मिन्नाटके पात्राणि भौमानि। कविरप्यत्र मर्त्यलोकीयमेव

वस्तुवर्णनं भूम्ना वितनुते। कथा चात्र कविकल्पिता। मालविका विदर्भराजस्य तनया। राज्ञः अग्निमित्रस्य राजधान्यां प्रेक्षागृहे सा राज्ञा प्रथममदर्शि। तत्र च नाट्यं कुर्वाणा सा अग्निमित्रस्य मनो जहार। भूयसा च तन्नाट्यं मर्त्यलोकाभिनयैरेव सम्पन्नम्।

द्वितीयं नाटकमस्य महाकवेर्विक्रमोर्वशीयं नाम। अत्र च पात्राणि दिव्यानि। ऊर्वशी नामाप्सरःकान्ता कुबेरं संसेव्य सख्या चित्रलेखया साकं स्वर्गं प्रतिनिवर्तमाना मध्येमार्गं 'केशि' नाम्ना राक्षसेन बलादपहृता। तस्याः आक्रन्दनं श्रुत्वा 'पुरूरवाः' नाम राजा तामुपेत्य तमसुरं निहत्य ऊर्वशीं ससखीं मोचयामास। तयोः प्रणयवृत्तान्तोऽत्र नाटके वर्ण्यते। अत्र नाट्यऽऽचार्यः 'भरत' मुनिरपि दिव्य एव। अतोऽत्र पात्राणि प्रायः दिव्यान्येवोपनिबद्धानि महाकविना।

तृतीयमस्य रूपकं 'शाकुन्तलम्' नाम नाटकम्। इदं तु विश्वविश्रुतिमवाप। सुपरिणतश्चास्य महाकवेः काव्यकलाविशेषोऽत्र नाटके सर्वैस्समनुभूयते। मेनका-विश्वामित्रयोः पुत्री शकुन्तला पितृभ्यां मालिनीतीरे विसृष्टा, शकुन्तैः परिपाल्यमाना ब्रह्मर्षिणा कण्वेनाऽनीय परिरक्षिता दुष्यन्तस्य पौरवान्वयराजस्य प्रणयपात्रं बभूव। उभयोर्गान्धर्वविवाहानन्तरं स्वनगरं गतो दुष्यन्तः दुर्वासश्शाप-

वशात् शकुन्तलायाः व्यस्मार्षीत् । पश्चादभिज्ञानदर्शनेन स्मृतिं प्राप्य व्यलपत् । अन्ते च मारीचाऽऽश्रमे सपुत्रायाः शकुन्तलायाः पुनस्समागमसुखमनुभूय नितरां तुतोष ।

इति कालिदासस्य कृतिषट्कं लोके प्रसिद्धम् । तदद्य पठन-पाठनक्रमे वर्तते । अत एव महाटीकाकारेण मल्लिनाथसूरिणा :—

"कालिदासगिरां सारं कालिदासः, सरस्वती, ।
चतुर्मुखोऽथवा साक्षात् विदुर्नान्येतु मादृशाः ॥"

इति सत्यमेवोक्तं स्वयमनुभूय ।

"अस्पृष्टदोषा नलिनीव दृष्टा
हाराऽवलीव ग्रथिता गुणौघैः ।
प्रियाऽङ्कपालीव विमर्दहृद्या
न कालिदासादपरस्य वाणी ॥"

इत्यपि केनाचित् कविशेखरेण कविकुलगुरोः कालिदासस्य वाणी प्रस्तूयते स्म ॥

### अभ्यासः

१. 'अद'श्शब्दस्य रूपैः वाक्यत्रयं लिखत ।

२. विगृह्णीत :— कविकुलगुरुः, अधिष्ठितकालिदासा, सिद्धतापसः, आपादमस्तकम्, शिवौ ।

३. प्रश्नाः :— अ) कालिदासमधिकृत्य लोके प्रचलितां 'दन्तकथां' स्ववाक्यैर्लिखत ।
आ) तस्य कृतयः कति ? ताः काः ? एकैकां कृतिमधिकृत्य सङ्ग्रहेण स्ववाक्यैर्लिखत ।

इ ) अमुं कविमधिकृत्य प्रकटितं मल्लिनाथसूरेराशयं विवृणुत ।

ई ) पाठे अन्तिमस्य श्लोकस्य तात्पर्यं विवृणुत ।

४. अस्मिन् पाठे प्रयुक्तानां धातूनां प्रत्येकं लकाराणामभ्यासः कर्तव्यः । आत्मनेपदि-परस्मैपदिधातूनाञ्च विवेकः कर्तव्यः ।

५. एषां पदानामर्थाः विवेचनीया अध्यापकैः :-

सुशकम्, दन्तकथा, अभिशापः, कार्तिकेयः, भौमानि, दिव्यानि, काव्यवस्तु, प्रविविक्षुः, लोकप्रियता, दुरूहम्, कृपणः, आनखशिखम्,

६. व्याकरणविशेषा :-

i 'राजन्' शब्दः तत्पुरुषसमासान्ते अकारान्तो भवति । अतः 'दुष्यन्त-महाराजः' इत्युच्यते ।

ii 'स्मृ' धातोः प्रयोगे कर्मवाचकस्य पदस्य विकल्पेन षष्ठीविभक्तिः भवति । यथा – 'शकुन्तलायाः व्यस्मार्षीत्' इति ।

---

# ७. जातीय-पताका

अस्माकं देशे प्राचीनकालादारभ्य देवाऽलयेषु ध्वजस्तम्भाः दृष्टिपथमापतन्ति। ध्वजः केवलं स्तम्भो दण्डो वेति मतिरसमीचीना। निर्गुणस्य भगवतो विविधाः प्रतीकाः वर्तन्ते। तान् पूजयित्वा मानवो भगवत्सन्निधिमिवानुभवति। एवञ्च ध्वजोऽपि देवतानां प्रतीकोऽस्ति। बहोः कालात् प्रभृति गैरिकवर्णो ध्वजः भारतदेशे प्रचलितः।

यथा देवतानां तथा वीराणामपि ध्वजाः आसन्। ते प्रभोः रथे संलग्नाः अदृश्यन्त। ध्वजपटा अपि विविधाऽयामा आसन्। तेषु पटेषु कानिचन दैवतानि लिखितान्यासन्। ध्वजानां समुल्लेखः वेदेषु महाभारताऽदिषु च ग्रन्थेषु लभ्यते। ध्वजो गौरवचिह्नमासीद्वीराणाम्। महारथाः ध्वजमुल्लास्य साटोपं युद्धरङ्गमागच्छन्ति स्म। दृढमतयो वीराग्रण्यः युद्धे प्राणानपि तत्यजुः, न तु ध्वजान् ध्वजो न केवलमेकस्य वीरस्य प्रतीकः, किन्तु सर्वासां प्रजानां निखिलस्य च राज्यस्य स्वातन्त्र्यप्रतीकः। पूजास्थानं चैषः। वेदेषु बृहत्केतुरिति अग्निदेवतायाः सहस्रकेतू इति अश्विनोः संज्ञे उपलभ्येते। महाभारतेऽपि अर्जुनः कपिध्वजः, अश्वत्थामा सिंहलाङ्गूलध्वजः, भीष्मस्तालध्वजः, भीमः

सिंहध्वजः इति वर्णना वर्तते। सूर्यवंशस्य कोविदारध्वज इति रामायणेऽप्युक्तम्। इतिहासकालेऽपि बहवः शूराः ध्वजसम्मानार्थं जीवितं तृणाय मन्यमानाः युयुधिरे। स्वातन्त्र्यसङ्ग्रामकालेऽपि त्रिवर्णध्वजं सर्वस्वं मत्वा ध्वजहस्ताः 'वन्दे मातरम्' इत्युदीर्य आंग्लरक्षकभटानां क्रूरप्रहारान् सहन्ते स्म। धन्या तेषां तितिक्षा।

अयमेव त्रिवर्णध्वजोऽस्माकं राष्ट्रध्वजः। राष्ट्रगौरवं तस्मिन् पिण्डीभूतमिव दृश्यते। स्वातन्त्र्यदिने गणतन्त्रदिने चैतस्य ध्वजस्योन्नयनं पूजनं च ग्रामे—ग्रामे श्रद्धया कुर्वन्ति भारतीयाः।

अस्य ध्वजस्य रक्तपट्टिका पूर्वेषां भारतीयानां स्वातन्त्र्य-समरे त्यागं प्रकटीकरोति। श्वेतपट्टिका तेषां पवित्रशीलत्वं, तथा हरितपट्टिका देशस्य सस्यश्यामलतां च प्रकटीकुरुतः।

असौ राष्ट्रध्वजः सगर्वमाकाशवीथ्यां पवनोदीरितो विलसति। विधानसभाभवनेषु सर्वत्र प्रकाशते। अस्माकं ये पूर्वे वीराः ध्वजस्य सम्मानार्थं घोराः पीडाः नागणयन् तानयं ध्वजः स्मारयति। स्वातन्त्र्यसमरकालेऽयं त्रिवर्णो ध्वजः सर्वेषां प्रोत्साहजनक आसीत्। "वरं मृत्युः, न पुनः ध्वजावपतनम्" इति सम्प्रधार्य पुरुषाः स्त्रियश्च महात्मगान्धीनां नेतृत्वे स्वातन्त्र्याऽन्दोलनं अहमहमिकया अकुर्वन्।

स एव ध्वजोऽधुना स्वतन्त्रभारताऽकाशे सोल्लासं खेलति। न कदाऽपि तस्य मानहानिर्भूयात्। ध्वजं यस्मिन् कस्मिन्नपि दिने, यत्र कुत्रापि वा नोन्नमयेत्। ध्वजस्य सन्निधौ राष्ट्रस्य चिन्तनं विना नान्यत्किमप्यालोचयेत्। परमत्याग-स्मारकं राष्ट्रध्वजं प्रणम्य देशहिताय वयमपि यथाशक्ति यथामति च प्रयत्नं कुर्यामेति निश्चिनुमः।

### अभ्यासः

१. प्रश्नाः-

(अ) सामान्यतः ध्वजस्य प्राधान्यं विवृणुत।

(आ) राष्ट्रध्वजे स्थितास्त्रिवर्णपट्टिकाः किं सूचयन्ति ?

२. 'लोचृ' धातोः आङ्पूर्वकस्य लुङ्लिटौ आवर्तनीयौ।

३. विगृह्णीत :- स्वतन्त्रभारतः, परमत्यागस्मारकम्।

४. समस्यत :-(अ) मतिम्+अनतिक्रम्य।

(आ) उल्लासेन+सह यस्मिन् कर्मणि यद् यथा भवति तत् यथा।

(इ) सस्यैः+श्यामला।

## ८. विहार-यात्राः

श्रीराम :– अयि मित्र ! श्रीकृष्ण ! अपि पश्यति भवानिदं विद्याऽर्थिनां बृन्दम् ?

श्रीकृष्णः– पश्यामि, पश्यामि श्रीराम ! किन्तु नैवावगच्छाम्येतस्य बृन्दस्य सन्नाहे हेतुम् । एते खलु कटिबद्धाः, कवचिनो, निषङ्गिणश्च विस्मयमादधाति ।

श्रीराम :– समालोचय तावत् ।

श्रीकृष्णः– विचार्यापि नैवात्र हेतुमनुसन्दधामि, एष समूहः कुत्र प्रयाति ? कुतो वा हेतोः ? इति ।

श्रीराम :– वदामि सावधानं शृणु ।

श्रीकृष्णः– अवहितः शृणुयाम् । ब्रूहि ।

श्रीराम :– एते खलु विद्याऽर्थिनः विद्यामभ्यस्यन्तः देशे विहर्तुमिच्छन्ति ।

श्रीकृष्णः– किमर्थोऽयं विहारः ?

श्रीराम :– एते खलु एतत्पर्यन्तं ग्रन्थपठने अवदधुः । इदानीन्तु पठितं सर्वमपि चक्षुर्भ्यामवगन्तुमिच्छन्ति । एवमवगतं सर्वं दृढीभवति, स्थिरीभवति च । “ सर्वेन्द्रियाणां नयनं प्रधानम् ” इति खलु वदन्ति ।

श्रीकृष्णः— नैवं यदि ?

श्रीराम :— पठितमनुभवविहीनं न विज्ञानाय प्रभवेत्। 'ज्ञानं विज्ञानसहितम्' इति खलु गीता यामुक्तम्।

श्रीकृष्णः— कथमेतादिति विवृणोतु भवान्।

श्रीराम :— इदानीं वयमत्राऽन्ध्रप्रदेशे निवसामः। अत्र सदाचारान्, वेषभाषाऽऽदिकं च प्रत्यक्षेण सम्यगवधारयामः। तथाऽन्यत्रप्रदेशेषु-कर्णाटेषु, केरलेषु, द्रविडेषु, महाराष्ट्राऽदिष्वपि तत्तत्प्रदेशीयानां वेषभाषाः कीदृश्यः स्वभावाश्च किंविधाः ? का च फणितिः ? तत्र विद्वांसः किंप्रकाराः ? ते कासु कासु कलासु विनीताः ? कथं वा ते परिणताः ? तेषु च के विशेषाः परिगणनमर्हन्ति ? केषां च विशेषाणां परिग्रहणं युज्यते ? कीदृशी वा वृत्तिस्तत्राऽद्रियते ? इत्यादिकं सर्वमस्यां यात्रायां विद्याऽर्थिनः गृह्णीरन्। नो चेदेते विषाणविकलाः उक्षाण एव भवेयुः।

उक्तं च :— "देशान्तरेषु वेष-स्वभाव-भणितानि ये न जानन्ति।
समुपाऽसते न च गुरुं विषाणाविकलास्त उक्षाणः॥"
इति।

अत एव विद्याऽधिकारिणः एतादृशीर्यात्राः प्रोत्साहयन्ति। किं चायं विशेषः, एवं यात्रावशात्

काशी, गया, प्रयागः, अयोध्या, तक्षशिला, नलन्दा, पाटलीपुत्रम्, धान्यकटकम्, रामेश्वरम् इत्यादीन्यपि पुण्यक्षेत्राणि, विद्यास्थानानि च आसेवन्ते। अयमाचारः तीर्थं स्वार्थं च सङ्कल्प्य साधयति। सनातनः सदाचारश्चायम्। 'स्नातकव्रतं गृह्णानः व्रतान्ते त्रीन् वर्षान् अटेत्' इति व्यवस्थामकार्षुरस्माकमाचार्याः। एते च विद्याऽर्थिनः विद्याव्रतस्नातकाः खलु। अत एवैतद्व्रतान्ते अमीभ्यो विद्याऽर्थिभ्यः क्रियमाण उपन्यासः स्नातकोपन्यास इत्युच्यते। निष्णात इति पदं च विद्याव्रतस्नानं सूचयति।

अयं च विद्याऽर्थिनिवहः यात्रामाचरितु-मुद्युङ्क्ते। तदर्थं एवायं सन्नाहः। यात्रायां शीतवाताऽतपापनोदनायावश्यं कवचादयः उपादेया भवन्ति। वस्त्रान्तराऽदीनि चावश्यं सङ्ग्राह्याणि। तान्येव पृष्ठे धार्यमाणानि दृश्यन्ते।

एवं यात्रां कुर्वाणाः विविधं गच्छन्ति सोपान-द्भ्यां पद्भ्यां शकटैः। एवमिदानीं प्रयाणं कर्तुमिदं विद्याऽर्थिनां बृन्दम् 'क्षेमेण गत्वा लाभेन निवर्तिषीष्ट' इत्याशास्महे।

## अभ्यासः

१. प्रश्ना :– (अ) विहारयात्राणामभावे को लोपः ?
(आ) यात्रायां शीतवाताऽतपाः कथं निवार्यन्ते ?
(इ) विद्यार्थिनः स्नातका इति कथं प्रमाणितम् ?
(ई) निष्णात इति पदेन किं सूच्यते ?

२. विगृह्णीत :– विहारयात्राः, विद्याऽधिकारिणः ।

३. समस्यत :– विद्यार्थिनाम् + बृन्दम्; शीतश्च + वातश्च + आतपश्च ।

४. सविशेषमभ्यस्यत :– अनयोः पुरुषयोर्वचनान्तराणि " वक्ष्यामि । आदधति।

५. पाठस्थपदैः पूरयत :– (अ) समूहः ......... प्रयाति ।
(आ) क्षेमेण गत्वा ......... निर्वर्तिषीष्ट ।
(इ) पठितं ......... न विज्ञानाय ।

६. 'विद्यार्थिन्' शब्दस्य प्रथमाविभक्तौ वचनत्रयेण वाक्यानि रचयत ।

## ९. मतप्रवक्तारः

अखण्डमेतद्धरामण्डलं मण्डयन्तो मताऽचार्याः स्वबोध-सुधायाः प्रभावेण प्रभावयन्ति हीमं नरप्रपञ्चम्। ते हि नरानुपकर्तुमात्मीयं बोधामृतं मतरूपेण प्रवाहयन्ति। मतं च नाम जडस्य प्रपञ्चस्य, अजडस्य चेतनस्य च सम्बन्धतत्व-मुद्बोधयति। किञ्चेदं परमात्मनि मनुष्यैरनुष्ठेयं धर्मं चोपदिशति। इदमनेकैर्नामभिर्व्यवह्रियते। तानि च नामानि-वैदिकमतम्, जोराष्ट्रियन्मतम्, बौद्धमतम्, खिस्तुमतम्, महम्मदीयमतम् इत्यादीनि।

एतेषां मतानां द्रष्टारः प्रवक्तारो वा परिगण्यन्ते :—



वेदाः, जोराष्टरः, गौतमबुद्धः, एसुखिस्तुः, महम्मदश्चेति।

तत्र वैदिकमतं चतुर्धा प्राचालीत्। "अद्वैतम्, विशिष्टाद्वैतम्, द्वैतम्, शुद्धा-द्वैतम्" इति। एतेषां प्रवक्तारः यथाक्रमं इमे आचार्याः गण्यन्ते :— "शङ्कराऽचार्यः, रामानुजाऽचार्यः, मध्वाऽचार्यः, वल्लभाऽचार्यश्च" इति। एते चत्वारोऽपि दक्षिणात्याः।

तेष्वाद्यः श्रीशङ्कराऽचार्यः केरलेषु "कालटी" नाम्नि अग्रहारेऽजनि। अयं ग्रामः पूर्णानदीतीरे वर्तते। अस्य पिता 'विद्याधिराजः' इत्यपरनामा शिवभट्टः, माता च आर्याम्बा, गुरुः श्रीगोविन्दभगवत्पादाऽचार्यश्च आसन्। अयमाचार्यः जीवेश्वरयोरभेदनिष्ठं अद्वैतमतं प्रोक्तवान्।

द्वितीयः श्रीरामानुजाऽचार्यः आन्ध्रदेशस्य पर्यन्तसीम्नि तोण्डमण्डले 'श्रीपेरुंबूदूरु' नामनि ग्रामे जन्म लेभे।



माताऽस्य कान्तिमतीदेवी, पिता च आसूरि केशवसोमयाजी, प्राऽचार्यः यामुनमुनिश्चाऽसन्। एष आचार्यः विशिष्टाद्वैतमतमस्थापयत्। मतेऽस्मिन् प्रकृतिजीवविशिष्टः श्रीनिवासः तत्त्वमिति कथ्यते।



तृतीयश्च श्रीमध्वाऽचार्यः आनन्दतीर्थापरनामा कर्णाटेषु 'उडिपि' समीपे 'पाजक' ग्रामे अजायत। अस्य वेदवेदी माता, मध्यगेहभट्टः पिता, आचार्यः अच्युतप्रेक्षश्चासन्। जीवस्य ईश्वरस्य च भेदैकनिष्ठं द्वैतमतं अनेन उदभावि।

तुरीयः श्रीवल्लभाऽचार्यः । अस्य जन्मना आन्ध्रेषु पश्चिमगोदावरीमण्डलं पवित्रितमभवत् । इममाचार्यमधिकृत्य 'विल्सन्' नामा महाऽशयः एवमाह :—"कंकरवाड-नामा ग्रामः अस्य पितृपैतामहं स्थानम् । जन्मभूमिरस्य 'रायपूर्' नाम्ना प्रसिद्धं चम्पाऽरण्यम् । माता एल्लमाऽम्बा, पिता लक्ष्मणभट्टः, भार्या लक्ष्मीश्चाऽसन् । आचार्यः बिल्वमङ्गलः स्यात्" इति । अयमाचार्यः शङ्करस्य मायाऽद्वैताद्विविक्तं शुद्धाद्वैतं नाम मतमुपदिदेश । चतुर्णामप्येषां मतानां वेदाः प्रमाणम् । अन्येषां तु मतानां न तथेति तान्यवैदिकानीत्युच्यन्ते ।

अथावैदिकेषु 'जोराष्ट्रियन्' मतं प्रस्तूयते । आचार्यः जाराष्टरः इदं मतं निरवहत् । अस्य 'जरतुष्ट' इत्यपि नामाऽस्ति । मातापितरौ चास्य न ज्ञायेते । एतन्मतं 'जेण्ड् अवेस्था' इति पारसीक-ग्रन्थेन प्रमाण्यते ।

अथ बौद्धमतं प्रस्तूयते । मतस्यास्य प्रवक्ता गौतम-बुद्धः । स च हिमाद्रेरुपत्यकायां रोहिणीनदीतीरे कोसलदेशे 'कपिलवस्तु' नाम्नि नगरे अजायत । तं देशं राजा शुद्धोदनः पालयति स्म । तस्य पत्नी मायादेवी आसीत् । तौ गौतमबुद्धस्य मातापितरौ । तस्य महानुभावस्य अवतारेण न केवलं कोसलदेशः, किन्तु समग्रोऽयं भारतदेशः पूतो विभूषितश्च । अयमाचार्यः पिप्पलवृक्षस्य अधस्तात् बोधौ

अहिंसाप्रधानमिदं मतमपश्यत् । तदारभ्य स वृक्षः 'बोधिद्रुमः' इति ख्यातिमवाप । एतेन गौतमबुद्धेन प्रोक्तमिदं मतं सर्वत्र भारतभूमौ व्याप्तिमवाप । तत एतन्मतमवजिगमिषन्तः चैनीयाः 'ह्यून्त्सांग्' प्रभृतयः भारतदेशं यात्रापदमकार्षुः । ततःप्रभृति अनेकदेशेभ्यः अनेके स्वयात्राभिरेनं देशं प्रख्यापयामासुः । ततश्चैतत् मतं चीना, मङ्गोलिया, जपान्, सयाम्, जावा, सुमात्रा, सैबीरियाऽऽदिष्वपि देशेषु प्रचितमभूत् । यद्यप्य द्य जन्मदेशे द्य विरलतामिदं मतमभजत्, तथाऽपि विदेशेषु षोडशकलाभिः प्रकाशते ।

ख्रिस्तुमतस्य प्रवक्ता एसुख्रिस्तुः । अस्य जननी 'मरिया' नाम कन्या । पिता 'योसेफुः' । एष च आचार्यः स्वप्रवचनानां बोधानां च प्रभावेणैव एसुपदमवाप । ईशपदस्य विकृतिरूपं एसुपदमिति मन्यते ।

महम्मदीयमतस्य व्यवहारः तत्प्रवक्तुः महम्मदस्य नाम्नैव ख्यायते । 'इस्लाम्' मतमिति चास्य व्यवहारः । अरेबियादेशो महम्मदस्य जन्मभूमिः । महम्मदस्य बोधाः प्रवचनानि च 'अरब्' भाषानिबन्धे 'खुरान्-ए-शरीफ्' नामके प्रसिद्धानि । इदं मतं आफ्रिका, आसिया, यूरोप् इत्यादिखण्डेषु व्याप्नोत् ।

"आचार्यदेवो भव" ।

## अभ्यासः

१. प्रश्ना :– (अ) मतस्य स्वरूपं किम् ?

(आ) तस्य किंवा प्रयोजनम् ?

(इ) कुतो मतं वैदिकम् ?

(ई) अवैदिकमिति कस्मात् ?

(उ) वैदिकं कतिधा प्राचालीत् ?

(ऊ) श्रीशङ्कराऽचार्यः कीदृशं मतमस्थापयत् ?

(ऋ) वैदिकमतानां नामानि कथयत ।

२. एतानि यथोचितं वाक्येषु योजयत :– चतुर्धा, प्राचालीत्, प्राऽचार्यः, भेदैकनिष्ठम्, चम्पारण्यम्, षोडशकलाभिः, प्रकाशते, एसुपदमवाप, व्याप्नोत् ।

३. कण्ठस्थीकुरुत :–

| | | | |
|---|---|---|---|
| प्र. पु :– | असविष्ट | असविषाताम् | असविषत । |
| म. पु. | असविष्ठाः | असविषाथाम् | असविध्वम्, असविढ्वम् |
| उ. पु. | असविषि | असविष्वहि | असविष्महि |

पूङ=प्राणिप्रसवे, आत्मनेपदी धातुः । लुङ ।

| | | | |
|---|---|---|---|
| प्र. पु :– | अचालीत् | अचालिष्टाम् | अचालिषुः |
| | अचालीः | अचालिष्टम् | अचालिष्ट |
| | अचालिषम् | अचालिष्व | अचालिष्म |

चल=कम्पने । परस्मैपदी धातुः । लुङ ।

४. समस्यत :– प्रकृतिश्च+जीवश्च+विशिष्टः= । न विद्यते द्वैतं यस्मिन् तत् ।

५. अर्थाः :– जनपदाः=देशाः; पिप्पलः=अश्वत्थः; प्रवक्ता=मतोपन्यासकः ।

# १०. झान्सीलक्ष्मीः

"आकरे पद्मरागाणां कुतः काचोद्भवो भवेत्"

वीरप्रसूर्भारतमाता। अस्याः गर्भे अनेकानि वीर-रत्नान्याविरभूवन्। प्रत्तापरुद्र, शिवाजी, प्रतापसिंह-प्रभुतयः यथा वीरसिंहाः तथा बह्व्यो वीररमण्यश्च उदभूवन्। तास्वन्यतमा झान्सीलक्ष्मीः। न केवलमियं झान्सी-नगरस्यैव लक्ष्मीः, किन्तु सकलस्याप्यस्य भारतदेशस्य स्वातन्त्र्यलक्ष्मीरेव। अनयोप्तपूर्वमेव स्वातन्त्र्यस्य बीजमिदानीं फलितमभवदित्यस्याश्चरित्रेऽवलोकयामः।

आसीत् 'मोरोपन्त' इति कश्चन सुप्रसिद्धः महा-कविर्महाराष्ट्रेषु। तस्य कवितासारस्येनाऽवर्जितः द्वितीय 'बाजीराव्' नामा मन्त्री महाराष्ट्रस्य आस्थानकविपदे तं मोरोपन्तं समपूजयत्।

तस्य महाकवेः तनूजेयं लक्ष्मीः। मातापितृभ्यामस्याः प्रथमदत्तं नाम 'मनूबाई' इति। अमूं प्रसूय माता अचिरादेव परलोकमयासीत्। पिता तु मातृनिर्विशेषं एनामपोषयत्।

स मन्त्री च अनपत्यः बालकमेकं पुत्रत्वेन स्वीचकार। 'नानासहेब्' इति तस्य नाम। सोऽस्याः सवयस्कः। अयमेनां सोदरीमाभिमन्यमानः 'चम्बेली' इति

प्रियनाम्ना व्यवहरन् अनया सह क्रीडति स्म। क्रमशः वर्धमानेयं मनूबाई वयस्येन सह युद्धविद्यां, खड्गचालनं, दण्डव्यायामं, अश्वारोहणं, गजारोहणं, समभ्यस्यत्। युद्धकलायां राजनीतौ च विनीता बभूव।

एतस्या भाग्यरेखामालक्ष्य ज्यौतिषिकाः 'अस्याः राज्ञीपदं सम्पत्स्यते' इत्युदर्कमसूचयन्। तदा झान्सीराज्यं स्वतन्त्रमेवावर्तत। 'गङ्गाधर' नामा 'पीष्वा' वंशीयः तद्राज्यं शास्ति स्म। तस्य पत्नी कालधर्ममवाप। स तपस्वी अनपत्यश्चाऽसीत्। एतस्मादनन्तरं राज्यं शास्तुं पुत्रः नाऽसीत्। अतः मनू बाई गङ्गाधरः परिणेतुमैच्छत्।

पित्रा दत्ता परिणीता चेयं श्वशुरकुलं जगाम। स्वयं लक्ष्मीरेव समागतेति एतस्याः श्वशुरकुले इयं लक्ष्मीनाम्ना व्यवहृता। कालेनैषा पुत्रमसूत। किन्तु स जातः अल्पमेव कालं जीवित्वा पित्रोर्हर्षेण सह अस्तमुपगतः।

तद्दुःखेन गङ्गाधरः रुग्णो बभूव। तदा 'आनन्दराव्'-नामानं कंचन बालकं पुत्रत्वेन स्वीचकार। सा च दत्तता आङ्ग्लेयानामनुमत्यैव निर्व्यूढा। ततः स बालकः 'दामोदर' इति नाम्ना व्यवहृतः। तदेव नाम अन्ततः 'दौर्भाग्यदामोदर' इति सार्थकं अभूत्, यतः स पर्यवसाने राज्येन हीन एवाभवत्।

'बालकस्य राज्यार्हताप्राप्तिपर्यन्तं मातैव राज्यं शास्तु' इति व्यवस्थामाङ्ग्लेयैर्मानयित्वा निश्चिन्तः सन् गङ्गाधरः अस्तमगमत्। पुत्रशोकसन्तप्तहृदयायाः लक्ष्म्याः पत्युर्मरणेन द्विगुणीभूतं दुःखं दुस्सहमासीत्। एवं दुःखाभिभूताऽपि दत्तपुत्रस्य दर्शनेन आश्वस्ता सा स्वविधिनिर्वहणं राज्यपालनाऽदिकं च सम्यक् चकार। एतादृश्यामपि दशायां अशिथिला तस्याः कर्तव्यदीक्षा प्रशंसनीया खलु। 'प्रवातेऽपि निष्कम्पाः खलु गिरयः'। 'लक्ष्मणराव्' नामानं कञ्चन सहायकमवलम्ब्य सा राज्यं निर्वहति स्म। दत्तपुत्रमपि दामोदरं प्रसूतादप्यधिकतरं प्रेम्णा पोषयति स्म।

तस्मिन् काले 'डल्हौसी' नामा कश्चन आङ्ग्लेयः अधिकारी बभूव। स चास्मिन् भारतदेशे स्वतन्त्राणि राज्यशकलानि गिलितुमैच्छत्। तदर्थं स राहुरिव भारतदेशस्य स्वातन्त्र्यचन्द्रं ग्रसितुं समकल्पयत्। 'औरसैर्विरहितानि राज्यानि आङ्ग्लेयानामेव स्वत्वम्' इति नीतिश्च प्रकल्पिता। तदनुसारमेव "सतारा, करवली, नागपूर्" राज्यानि आङ्ग्लेयाः स्ववशमनैषुः। अयोध्यायाः पालयितुः महम्मदीयस्य प्रवर्तना न समुचितेति तदपि राज्यं अपजह्रुः।

दत्तपुत्रत्वेन निर्णीतपूर्वोऽपि दामोदरः अनौरसतया राज्यपालनानर्हः इति निरणैषुः। झान्सीलक्ष्म्याश्च प्रतिवर्षं

पञ्चसहस्रकाणि रूप्यकाणि नष्टपरिहारत्वेन दातुं च निश्चयं चक्रुः ।

बाजीरावमन्त्री चापि कालगतिमवाप । दिल्लीचक्रवर्तिनमपि स्वपदात् च्यावयितुं आलोचयामासुराङ्ग्लेयाः ।

अतस्तस्य क्रोधस्सञ्जातः । एवमेतेषां सर्वेषां हृदयेऽग्निरिवोत्थितः क्रोधः । तस्मिन्नेव समये सूकरमज्जया निर्मिताः नालिकाः स्वदशनैरुत्कृत्य अग्न्यायुधानां (Rifle) निवेष्टव्या अयोनालीषु इति सैनिकान् आदिदिशुराङ्ग्लेयाः । एष आदेशः हिन्दूनां महम्मदीयानां च मनसि जुगुप्सां आङ्ग्लेयेषु द्वेषं च जनयामास । ततः देशे समन्ततः आङ्ग्लेयेषु असम्मातिरुदियाय ।

एतस्मिन्नेव समये सप्तपञ्चाशदुत्तराष्टादशशततमे ख्रिस्त्वब्दे (१८५७) सैनिकाः विप्लवमुदपादयन् । प्रथमं 'बारक्पुरे, ततः 'मेरट्' नगरे च तैः विप्लवोऽङ्कुरितः । स्वातन्त्र्यार्थं समरश्च देहलीपुरे समारभ्यत । तदैव 'बहदुर्शाह' नामा चक्रवर्तिपदे समारोपितः ।

झान्सीनगरे तु लक्ष्मीः आङ्ग्लेयान् प्रत्यवतस्थे । "अहम्मद्षाह, तान्तिया तोपे" प्रभृतयः प्रमुखा वीराः बहवः तस्याः सहाया बभूवुः ।

झान्सीवप्रस्य अन्तरेव पञ्चदशादिनपर्यन्तं स्थित्वा लक्ष्मीः वीरविहारमकरोत् । तां सप्राणामेव ग्रहीतुं आङ्ग्लेयाः प्रायतन्त । तथाऽपि सा नैवाबध्यत ।

अन्ततस्तु प्राकारमपहाय पुरुषाऽकारमास्थाय प्रस्थाय अश्वमारुह्य 'कान्पूर्' पुरं प्रति प्रययौ, प्रत्यवतिष्ठमानान् आङ्ग्लसैनिकानसेः बलिमकार्षीत् ।

कतिचनाऽङ्ग्लयोधाः तामनुदुद्रुवुः । तथाऽपि सा नैवाग्राहि । जघान चैतानन्युप्रयातांस्तिलशः ।

एवं स्थिते 'कान्पूर्' साल एव 'हेवलक्' नामा आङ्ग्लसेनापतिः नानासाहेब्वीरमजयत् । अत्रान्तरे तान्तियातोपे—साहाय्येन लक्ष्मीः 'ग्वालियर्' प्राकारमगृह्णात् । तत्र तस्याः सैन्यानि साहाय्यं चक्रुः । तद्वरणाधिपः 'जयाजी' नामा सिन्धियाराजः 'आग्रा'—वरणं प्रतिपालयामास । लक्ष्मीश्च नानासाहेब्नामानं पीष्वावंशीयं राज्याधिपतिं चकार ।

ततः आङ्ग्लसेनाः ग्वालियर्वरणमवारुधन् । लक्ष्म्याः तान्तियातोपे—साहाय्यं च प्रत्यबध्नन् । अतस्सा असहायैव आङ्ग्लसैनिकैः सहायुध्यत । तस्मिंश्च समरे एतस्या एकं नयनं हस्तश्च व्यवाच्छिद्येताम् । तथाऽपि सा नैवाभैषीत् । अनेकैः सह युध्वा तानाङ्ग्लवीरान् मारयामास । अत्रान्तरे

कश्चनाऽङ्ग्लसैनिकः अलक्षितः पृष्ठत आगत्य एतामसिना जघान। तदैवैषा स्वासिना तं कुहकं चकर्त। स्वयमपि सा वीरस्वर्गमवाप।

तस्याः शरीरं शत्रोर्हस्तगतं मा भूदिति 'रामचन्द्रराव्' नामा देशभक्तः योधानां साह्येन तच्छरीरं दूरतो निनाय। तस्य संस्कारं च निरवर्तयत। लक्ष्म्याः भौतिकं शरीरं विशीर्णमपि कीर्तिशरीरमविशीर्णमेव वर्तते। सा खलु वीरनारी सर्वेषां देशस्वातन्त्र्यपिपासूनां आदर्शभावमधिगच्छति। तदुप्त-पूर्वमेव स्वातन्त्र्यबीजं क्रमशः अङ्कुरितं, पल्लवितं, पुष्पितं च भूत्वा सप्तचत्वारिंशदुत्तरैकोनविंशतिशततमे ख्रिस्त्वब्दे फलितमभूत्। परिणतं तत्फलं वयमद्य अनुभुञ्ज्मः।

अभिभूतिभयादसूनतः सुखमुज्झन्ति न धाम मानिनः।

**अभ्यासः**

१. क्त्वाऽन्तानि, ल्यबन्तानि च अव्ययानि परिशीलनीयानि। तयोर्भेदस्य लक्षणमपि अवगन्तव्यम्।

२. अर्थाः – उप्तपूर्वम् = पूर्वं निहितम्
निर्विशेषम् = भेदरहितम (क्रियाविशेषणम्)
उदर्कम् = भविष्यत्फलम्।

३. व्यतिरेकपदानि :–
दत्तपुत्रः × औरसपुत्रः
वर्धमाना × क्षीयमाणा
आश्वस्ता × दुःखिता
क्रोधः × शमः

४. समस्यत :–

अश्वस्य + आरोहणम्
राजकीयासु + विद्यासु
भाग्यस्य + रेखा
पित्रा + दत्ता
राज्येन + हीनः

५. रिक्तस्थानानि पूरयत :–

(अ) अनपत्यः बालकमेकं.........स्वीचकार ।
(आ) मन्त्री च कालगतिं......... ।
(इ) दिल्लीचक्रवर्तिनमपि स्वपदात्.........आलोचयामासुः ।
(ई) एकं नयनं......... ।
(उ) सिन्धियाराजः.........पालयामास ।
(ऊ) आंङ्गलसेनाः.........अवारुधन् ।

६. प्रश्नाः :–

(अ) भारतमाता वीरप्रसूरिति कथं ख्याप्यते ?
(आ) स्वातन्त्र्यबीजं केनोप्तम् ?
(इ) लक्ष्म्याः पितृदत्तं नाम किम् ?
(ई) अन्यन्नाम कुतः प्राप्तम् ?
(उ) कमुवाह लक्ष्मीः ? (ऊ) सा कासु विद्यासु शिक्षिता ?
(ऊ) नानासाहेब्नामा मनूबाईं कथमादृणोत् ?
(ए) डल्हौसीनामकः कः ? स किमकरोत् ?
(ओ) झान्सीप्रान्तरे कति दिनानि युद्धं प्रवृत्तम् ?
(औ) राज्यापहरणे आङ्गलेयैः कीदृशी नीतिरनुसृता ?

## ११. आन्ध्र कविता पितामहः

ब्रह्मर्षिः 'विद्यारण्यस्वामी' 'तुङ्गभद्रा' नदीतीरे 'हरिहर-बुक्कराय' नामभ्यां राजसोदराभ्यां 'विद्यानगरं' नाम नगरं निर्मापयामास। तस्य नगरस्य विद्यास्थानत्वात्, विद्यारण्यस्वामिना निर्मापितत्वाच्च तन्नाम सार्थमासीत्। कालेन तन्नगरं विजयनिधानं सञ्जातम्। अतस्तस्य 'विजयनगरम्' इत्यपि नाम व्यवहारपदवीं समारोहत्। अवैदिकराज-निर्मूलनेन साकं तत्र वैदिकधर्मस्य प्रचारं प्रसारञ्च श्रीविद्यारण्यस्वामी ताभ्यां राजभ्यां कारयामास।

खिस्तुशकस्य विंशत्युत्तर-पञ्चदशशततमेऽब्दे (१५२०) 'तुलुव' वंशीयो राजा 'श्रीकृष्णदेवरायः' तस्यां राजधान्यां स्थित्वा आन्ध्र-कर्णाटदेशौ परिपालयामास। तस्याऽस्थानसभा 'भुवनविजयम्' इति प्रख्यातिं जगाम। तत्कारणन्तु, यः कोऽपि वा महाकविः पण्डितो वा तदास्थानमागतः, तत्रत्यैः कवि-पण्डितैः विजितः परावर्तते स्म। अतस्तदन्वर्थमेव नाम तस्य।

तदानीं दक्षिणभारतदेशे 'अश्वपतीनां मुहम्मदीयानाम्, गजपतीनां ओढ्राणां राज्ञाम्, कर्णाटकाऽन्ध्राणाञ्च महीपतीनां त्रयं सुप्रसिद्धमासीत्। एतच्च राज्यत्रयं निरन्तरं परस्परं स्पर्धयाऽवर्धयत रणगुणध्वानिम्।

अयं च नरपपिः श्रीकृष्णरायः उत्तरस्यां दिशि अश्वपतिभिः, ऐशान्याञ्च गजपतिभिस्समुद्वेज्यमानः मन्त्रिभिस्सह कार्याऽलोचनामकार्षीत् । देशीयेषु स्वदेशाभिमानं, स्वधर्मश्रद्धां च वर्धयित्वैव शत्रूणां दण्डयात्राः प्रतिविधातुं शक्यन्ते । सा च वृद्धिः प्रजाः प्रतिबोध्यैव निष्पाद्यते । तच्च प्रतिबोधनं उत्तमयैव विद्यया सम्पद्यते । उत्तमा विद्या तु कवितैव । तथा चोक्तं :—

"न तच्छास्त्रं, न तच्छिल्पं, न सा विद्या, न सा कला ।
जायते यत् न काव्याङ्गमहो भारो गुरुः कवेः ॥" इति,
'कविता यद्यस्ति राज्येन किम्' इत्याभाणकम् ।

किन्तु 'कीदृशी कविता प्रजाः उद्बोधयितुमीष्टे' इति निर्णेयं भवति । अमुञ्च विषयं निर्णेतुं विद्वत्कविभिः भूयिष्ठैव सभा समर्हति । यथा चोक्तम् :—

"विद्वत्कवयः कवयः, केवलकवयस्तु केवलं कवयः" इति । अतस्तादृशीं सभां संयोजयामः इति निर्णये कृष्णदेवरायोऽतिष्ठत् । तादृशीं सभां परेद्युराह्वापयामास च ।

तत्र चाष्टौ विद्वत्कविदिग्गजानाजुहाव । ते च :— "अल्लसानि पेद्दनामान्यः, नन्दि तिम्मनाऽर्यः, मादय्यपुत्रो मल्लनः, भट्टुमूर्तिः (रामराज भूषणः), विश्वकवी रुद्रकविः,

तेनालि रामकृष्णः, धूर्जटिकविः, अय्यलराजु रामभद्रकविः" इति । तदनूचोऽन्यांश्च पण्डितान् समाह्वापयत् ।

तेषु च अल्लसानि पेद्दनमहाशयं वयोवृद्धं ज्ञानवृद्धञ्चाऽऽकलय्य स्वीयं महान्तमाशयं निर्णेतुं सदसस्पतिं विदधे । तत्र च प्रस्तावयामास स्वमनोगतम् ।

तदानीं तत्र समुपस्थितास्सर्वेऽपि विद्वांसः, कवयश्च कृष्णरायोदितं शुश्रुवुः । अपि तु, "कीदृशीं सरणिमवलम्ब्य प्रजास्संस्क्रियेरन् ? का च विद्यायाः पद्या प्रजानां श्रेयसे भूयात् ? कतमा च वाचामाचार्यता समनुबध्नात्येतौ देशकालौ ? कीदृश्या च कवितया प्रजाः राज्ये स्वधर्मं निर्वोढुं बद्धश्रद्धाः भवेयुः ?" इति निर्णेतुं तत्र न कोऽपि शशाक ।

तदा सा परिषत् निस्तरङ्गस्तरङ्गमालीवाऽऽसीत् । सूचीपातोऽप्यश्रावि । 'अस्य सदसः भुवनविजयम्' इति कीर्तिः तिष्ठेद्वा ? न वा ?' इति संशीतिरुदियाय । चकम्पे च तेनाऽऽन्दोलनेन मरुतेव सा सभा ।

तस्मिन् समये न केवलं नाम्ना किन्तु प्रतिभयाऽपि महत्तरः अल्लसानि पेद्दनाऽऽर्यः रायनरपतिना पृष्टाम्, तदुद्दिष्टाम्, आन्ध्रकर्णाटानामिष्टाम्, सर्वगुणैः पुष्टाम्,

शिष्टाम्, अदुष्टाञ्च कवितां स्वधिषणया धिषण इव निश्चित्य तदैवाऽशुधारया 'उत्पलमाला' वृत्तेन सदसि प्रादर्शयत्।

मुमुदे च मोचाफलस्वादुमुचस्तस्याः कवितायाः साऽशेषाऽपि परिषत्। नरपतिरतीव समतुष्यत्। सर्वेऽपि सभासदः आमोदमानास्तस्याः कवितायाः स्रष्टा विश्वसृडेवेति तं महाकविं 'आन्ध्रकवितापितामहः' इति बिरुदेनाभ्यनन्दन्। तदा नरपतिः श्रीकृष्णरायश्च तं स्रजा समभावयत्। 'कवि-गण्डपेण्डेरम्' इति सुवर्णाऽभरणं निर्माप्य पेद्दनाऽर्यस्य पादे स्वयमामुमोच। नवीनां सरसां तत्कालानुरूपामतीवोप-युक्तां च कवितामाशु सृष्टवतोऽस्य महाकवेरिदं बिरुदप्रदान-मनुरूपसमर्हणैव खल्विति सभास्तारैरन्वमन्यत।

एवं सभाजितस्समहाकविरान्ध्रकर्णाटयोर्मनःप्रवृत्ते-रनुगुणं वीर-शृङ्गाररसाभ्यामाप्लुतां 'मनुचरित्र' नाम्नीं कृतिं द्राक्षापाकशैल्या निर्माय रायनरपत्यङ्कितं चकार। तत्र च स्वारोचिषस्य मनोस्सम्भवमपदिश्य श्रीकृष्णरायस्य सम्भवमेव स कविर्निबबन्धेत्यपि श्रूयते।

तत्र च काव्ये रसमास्वाद्य हृष्टाः, तदाशयैश्च समाकृष्टाश्चेमाः प्रजाः रायमघोनः अभिमतां स्वधर्मे श्रद्धा-मादधिरे। देशस्य शर्मनिर्वहणे आन्ध्रसाम्राज्यस्य परिरक्षणे च प्रजाः बद्धश्रद्धाः, कटिबद्धाश्च बभूवुः। एतादृशीं च

कृतिं स्वीकृतवान् रायमघवान् । तदा स राजा तन्नगरोत्सवाय सन्नाहितां पेद्दनाऽर्याधिष्ठिताञ्च पल्यङ्किकां स्वहस्तेनोद्धार । 'कोकट' ग्रामादीननेकानग्रहारानपि पेद्दनाऽर्याय प्रददौ । तस्मिन् महाकवौ तस्य महाप्रभोः यावानादरः तं सर्वं तस्य प्रभोः परोक्षे स महाकविरित्थं वर्णयामास ।

"अभिमुखे मयि नैजमिभेश्वरं समवरुह्य हि दत्तकरश्च मे ।
समुपवेशयाति स्म गजोपरि प्रमदसम्भृतहृत्प्रणयेन माम् ॥१॥

त्वमेवार्हसि 'कविगण्डपेण्डेर' बिरुदस्य हि ।
इति हैमं नूपुरं स्वमामुमोच पदे मम ॥

'मनुचरित'कृतेः ग्रहणोत्सवे परिदधौ शिबिकां स्वयमेव मे ।
मदनुयुक्ततलेषु सुसम्भृतानगणितान् प्रमदाऽवृतमानसः ॥

कोकटाऽदीन् अग्रहारान् ग्रामान् राजपुरन्दरः ।
मह्यं समर्हणापूर्वमान्ध्रभोजो वितीर्णवान् ॥

आदरेणा'ऽन्ध्रकवितापितामह !' महाकवे ! ।
'अल्लसानि 'कुलेन्दो ! श्री पेद्दनाऽर्येति चाऽह्वयत् ॥

गाढाऽश्लेषं कुर्वतो राजमौलेः संश्लेषेण स्वर्गमेवानुगन्तुम् ।
शक्तो नाहं प्राणिमिह्यद्य जीवन्नप्याश्लिष्टो मृत्युनेवात्र वृद्धः॥

इति विलपन् 'राजन् ! भवता साकमहं स्वर्गमनुगन्तुं नाशक्नवम् ।' इति च चिन्तयामास । कृष्णरायोऽपि महा-

कविरासीत् । अतस्तस्य 'साहिती-समराङ्गणसार्वभौमः' इति बिरुदमद्यापि प्रसिद्धमेव श्रूयते ।

"किं किं न साधयति कल्पलतेव विद्या ?"

### अभ्यासः

१. अत्र पाठे 'लिट्—क्तवतु' प्रत्ययाः अभ्यसनीयाः ।

२. अर्थाः :– अश्वपतयः, गजपतयः, नरपतयः = क्रमशः तत्कालिकाः तुरुष्काः, ओढ्राः, कर्णाटाः, आन्ध्रराजाश्च सञ्ज्ञायन्ते । तरङ्गमाली=समुद्रः ।

३. व्यतिरेकपदानि :– उत्तरस्याम् × दक्षिणस्याम्
उत्तमः × अधमः

४. रिक्तस्थानानि पूरयत :–

(अ) उत्तमयैव ......... सम्पद्यते ।
(आ) भूयिष्ठैव सभा ......... ।
(इ) मुमुदे च ......... कवितायाः सभा ।
(ई) सुवर्णाऽभरणं ......... पेद्दनार्यस्य पादे ......... ।

५. विगृह्णीत :– गजपतिः, मनोगतम्, महाशयः, आन्ध्रकर्णाटाः ।

६. 'कृष्णराय' पदमुपयुज्य त्रिचतुराणि वाक्यानि निर्मात ।

प्रश्नाः :– (अ) 'अश्वपति–गजपति–नरपतिशब्दैः केऽभिधीयन्ते ?
(आ) 'भुवनविजयं' इति नाम कस्य ? कुतो वा तस्य तन्नाम प्रख्यातम् ?
(इ) रणगणध्वनिः कथमवर्धत ?
(ई) उत्तमविद्या का ? कुतः ?
(उ) अष्टदिग्गजानां नामान्युल्लिखत ।
(ऊ) कृष्णरायस्य राजधान्याः नामद्वयं किम् ? कुतस्तस्यास्तत्सञ्जातम् ?
(ऋ) कृष्णरायस्य विरुदं किमासीत् ? कुतस्तेन तत् विरुदं प्राप्तम् ?

## १२. मद्यपाननिषेधः

महात्मा गान्धी मद्यपाननिषेधं आंग्लदास्यनिषेधमिव प्रावेशयत्। इतः पूर्वमांग्लाः परतन्त्रेष्वस्मासु स्वाधिकारनिर्वहणार्थं धनसम्पादनार्थं च भारतदेशे मद्यपानं न निषिषिधुः। ततो वयं मतिहीना गतिहीनाश्चाभूम। तदपनोदनार्थमेव महात्मना मद्यपाननिषेधः प्रावेश्यत।

कथं वैतस्य मद्यस्य पानेन मतिहीनता गतिहीनता च समापतति? इति विचारयामः। न हि मद्यं पानीयं भवति। जलस्यैव 'पानीयम्' इत्यन्वर्था संज्ञा। कुतो वा मद्यं पानीयमिति भ्राम्यन्ति जनाः? इति न वयं जानीमः। मद्यपानं धननाशाय प्रभवेदिति न परोक्षं भवति। इयं हि सुरा पीयमाना क्रमशोऽनर्थं जनयति। एषा भ्रष्टताया निरवरोधा पदवी। पीता चेयं खलु सुरा आहारे अरुचिमुत्पादयति। प्रसिद्धमेव हि "कादम्बरीरसज्ञानामाहारोऽपि न रोचते" इति।

मद्यपानाभ्यासः शरीरे नानाविधानामयानुत्पादयति। वर्धयति च। ततश्च रक्तमाविलं भवति। ततो बुद्धेः स्थैर्यमुपहन्यते। मत्तस्तु धृतं वस्त्रमपि विस्मरति। कदाचिन्नग्न एव निर्लज्जश्चलति। मधुपायी क्रमशः क्षीणो भूत्वा मनोवाक्कायेषु

परिलघुर्भवति। तेनोच्चावचं जल्पति। अवशं भ्रमति। "प प पतामि ह हा भ भ भूतले" इत्यादि च जल्पति। तस्य नयनयोर्दृष्टिरिव पूज्येषु माननादृष्टिरपि विलुप्यते।

"अतिपानाद्रिक्तोऽयं ह्यवमतिमाप्नोति सर्वत्र।" कालिदासश्चाऽह:—"रिक्तस्सर्वो भवति हि लघुः" इति। किञ्च पानाय वित्तमन्विष्यन् स्वोत्तरीयमप्याद्मनं करोति। जायाऽपत्यादीन् बन्धूनपि बाधते। तद्भूषणान्यपहरति। तेषां धनमिव वचनमप्यवगणयति। तान् पीडयति। ताडयति च। माननीया अपि मानिनीरवमन्यते। तथाऽपि धनमलभमानः चौर्यं हिंसां वा प्रयुङ्क्ते। ततश्च राजभटैः बद्धः काराऽगारे निवेश्यते।

इत्थं भारतीयानां कुटुम्बजीवने अनादरेण विदेशीयप्रभुत्वेन मद्यपानं प्रोत्साहितम्। न निषिद्धम्। ते हि धनैकदृष्टयः सर्वदा धनं सङ्ग्रहीतुं इच्छन्तः शौण्डिकाऽऽपणानधिकसङ्ख्याकान् पर्यकल्पयन्। तत्प्रवर्तकेभ्यूत्पाद्य परस्परं स्पर्धां आपणशुल्कमवर्धयन्त। अतितरधनेनाऽपणानाग्रहणानाञ्च मूल्यमधिकं कृत्वा सुरां व्यक्रीणन्त। अत इदं मद्यपानं बहुमनर्थमुपजनयाति।

एतादृशेनानर्थपरम्पराऽऽपादकेन मद्यपानेन प्रजाः धनभ्रंश – स्वास्थ्यभ्रंश—मतिभ्रंश—धर्मभ्रंश – शीलभ्रंशाऽदिभिः पीड्यन्ते। एतत् सर्वं सम्यगालक्ष्य महात्मा गान्धी

भारतीयेष्वायुरारोग्यैश्वर्याणामभिवृद्धये सम्पदुपपत्तये चामुमासवपाननिषेधमुपपादयामास । उदबोधयच्चाम् : सर्वाः भारतीयाः प्रजाः "सुरापाननिषेधे बद्धश्रद्धाः भवन्तु, सकलाऽपन्मूलकमिदं मद्यपानमुत्सृजन्तु भवन्तः, तेन सर्वा आपदः निवर्तेरन्" इति, "कारणाभावे कार्याभावः" इति च।

इदं खल्विदानीं भारतीयानां प्राजानामेव प्रभुत्वम्। एतद्धि पालनं भारतीयानां आयुरारोग्यैश्वर्ययोगक्षेमाणि वर्धयितुमेव प्रयतते। प्रजानां सर्वतोमुखं विकासं मद्यपाननिषेध एवाऽदधाति। निषिद्धायां च कादम्बर्यां प्रथमत एव प्रजानां धननाशोऽवरुद्धस्स्यात्। ततश्चाऽयुरारोग्याऽदिकं सर्वं सर्वदा सुरक्षितमेव स्यात्।

प्रजानामभिवृद्धिरेवास्याः प्रभुतायाः परमं धनम्। सैवानया सततमभिलष्यते। अयमेवास्मत्पालकानां सिद्धान्तः। अतः मा पिबन्तु प्रजाः मद्यमित्यनुशास्ति प्रभुत्वम्। एवमस्य प्रजाप्रभुत्वस्योद्यममस्मदभिवृद्धये प्रवर्तमानं विज्ञाय वयमपि तस्य साह्यं दातुं प्रयतामहे यथा– न कश्चनाप्येतदनुशासनमुल्लङ्घयेत्, तथा वयमप्यक्ष्णां सहस्रैरवलोकयामः। यदि नाम कश्चन मद्यपाननिषेधं लिलङ्घयिषति, तं सान्त्वयित्वा तदुद्यमान्निवारयामः। एवमस्मत्प्रजाभिः दत्तहस्तमस्मत्प्रभुत्वं हालापाननिषेधं सर्वस्मिन्नपि भारते देशे सम्यक् प्रसार्य अस्माकं श्रेयोऽभिवृद्धये भूयात् इत्याशास्महे।

"न सुरां पिबेत्"

## अभ्यासः

१. प्रश्ना :–

(अ) मद्यपाने काऽनर्थपरम्परा प्रवर्तते ? अत्र अस्माभिः कर्तव्यं किम् ?

(आ) तन्निषेधं क उपादिशत् ?

(इ) प्रकृतपाठमवलम्ब्य व्याख्यात 'कारणाभावे कार्याभावः'।

२. विगृह्णीत :– मद्यपाननिषेधम् । मतिहीनाः । चौर्यद्यूतपरिश्रमः ।

३. समस्यत :– मद्यस्य + पानेन । गत्या + हीनता ।
अनुगतः + अर्थः + अनया ।

४. अर्था :– शौण्डिकापणः = मद्यविक्रयस्थानम् ।
आदमनम् = धनग्रहणाय प्रतिभूत्वेन वस्तुनिक्षेपः ।
कादम्बरी = सुरा.

५. पूरयत :– (अ) स्वोत्तरीयमपि ········· करोति ।
(आ) प्रभूतमेव ········· लभ्यते ।

# १३. नेहरूपण्डितस्य मरणशासनम्

( जीवनगङ्गा )

नेहरूपण्डित उपन्यस्यति :—

प्रयागसमीपे गङ्गायमुनाभ्यां सह शैशवमारभ्य ममानुबन्धो वर्तते। ममैधमानतामवलम्ब्य सोऽनुबन्धोऽप्येधमानः घनिष्ठ आसीत्। एकैकस्मिन् ऋतौ एकैकरीत्या दृश्यमानां तयोः नद्योः वैखरीं अवलोकयतः मम भावेषु युगेभ्यः आरभ्य तन्नदीद्वयेन सह गाढं प्रशिष्टं चारित्रं, पुराणानि, सम्प्रदायाः, विस्मयावहाः गाथाश्च स्फुरन्ति।

भारतीयानां नदी गङ्गैव। तां नदीमतल्लिकां भारतजातीयाः स्मृतयः कति वा लतावेष्टनं वेष्टयन्ति। एतस्य देशस्य आशाः, सन्देहाः, विजयाः, विजयगीतिकाः, अपजयाश्च अनया नद्या सह न विश्लेषयितुं शक्यन्ते। सेयं नदी एतद्देशीयायाः संस्कृतेश्च सङ्केतप्राया वर्तते। यथेयं गङ्गा निरन्तरं रूपान्तरैः परिणममाना पुरस्सरन्त्यपि सर्वेष्वपि कालेषु गङ्गैवाऽसीत् तथैवैतद्देशीयाः संस्कृतयः, नागरिकताश्च वर्तन्ते।

यदा गङ्गा मे स्मृतिपथं आगच्छति तदा सर्वदा हिमानीवृतानि गिरिशिखराणि अगाधाः प्रत्यन्तभूमयश्च ज्ञापिता भवन्ति। तानि शिखराणि, ते च गिरिपादाः मम

प्रियातिप्रियाः । सा गङ्गा मम जीवन-कर्तव्ययोः विहारभूमिः ।

उदयसमये अरुणकान्तिषु स्मितविभ्रमान् उल्लापयन्ती सोल्लासं नृत्यन्तीयं गङ्गा सायंसमये नीलच्छायासु पर्यस्तासु अन्धेन तमसा किमप्यज्ञातं भीषयति। हेमन्तर्तौ सविलासं प्रसरन्ती मन्दाकिनी सैव वर्षर्तौ समागते सघोषं महाप्रवाह-रूपेण समुद्र इव विस्तृत्य प्रवहन्ती रूपान्तरमाधत्ते। तदा तया क्रियमाणः प्रलयः सागरप्रलय एव । तस्याः स्मरणसमये सर्वदा भूतः कालः वर्तमानमभिव्याप्य गम्भीरसागरोपमं भविष्यन्तं प्रति प्रयाणं कुर्वन्निव भाव्यते ।

आस्माकीना सा महनीयानां परम्परा मम गर्वकारणं इत्यहं भावयामि । ऊहाऽतीतस्य प्राचीनकालिकस्य चरित्रस्य आदिमात् अहर्गणात् आरभ्य अविच्छिन्नं प्रसरन् भारतीयः कश्चन सम्प्रदायः जेगीयते। अस्मिन् सम्प्रदाये सर्वो भारतीयः जन इव अहमपि भागस्वामी। अमुं विषयं अहं कदाऽपि विस्मर्तुं न शक्नोमि । पारम्पर्येण प्रवर्तमानस्य तस्य भारतीयस्य सम्प्रदायस्य अन्तरायं कल्पयितुं नैवाहं शक्नोमि। एतादृश्याः अनेकपुरुषान्तरेभ्यः प्रवर्तमानायाः भारतीय-संस्कृतेः मम अन्तिमां श्रद्धाञ्जलिं समर्पयितुं मदीयं चिताभस्म मुष्टिपरिमितं अस्यां गङ्गायां प्रयागक्षेत्रे निमज्जयि-तव्यम् ।

तत् भस्म वहन्तीयं गङ्गा महासागरं प्रयान्ती मम भारतदेशस्य तीराणि स्पृशति ।

इति

जवाहर्लाल् नेहू

**अभ्यासः**

१. यणादेशसन्धिः, वृद्धिसन्धिश्च अभ्यसनीयौ ।

२. व्यतिरेकपदानि :– घनिष्ठः × विश्लथः । समीपम् × दूरम् ।
अनुबन्धः × विच्छेदः । स्मृतयः × विस्मृतयः ।
विश्लेषयितुम् × घटयितुम् ।

३. योग्यपदैः रिक्तस्थानानि पूरयत ।
(अ) भारतीयानां ········· नदी ।
(आ) गाथाश्च मम ········· स्फुरन्ति ।
(इ) मम ········· विहारभूमिः ।

४. प्रश्ना :–
(अ) नेहूपण्डितस्य केन अनुबन्धः ?
(आ) भारतीयानां नदी नाम का ?
(इ) पण्डितस्य प्रियाणि वस्तूनि कानिचित् कथयत ।
(ई) उदये, सायं, हेमन्ते, वर्षासु च गङ्गा कीदृशी ? स्ववाक्यैर्वर्णयत ।
(उ) नेहूपण्डितः कं विषयं विस्मर्तुं न शक्नोति ?

५. विगृह्णीत :– गङ्गायमुनाभ्याम् । नदीद्वयेन । हिमानीवृतानि । विजयगीतिका ।

# १४. प्रह्लादः

आसीत् कश्यपो नाम कृतगोत्रनामधेयः महर्षिः। अस्य दक्षदुहितरः चतुर्दश पत्न्योऽभूवन्। तासु दितिरदितिश्च सुप्रसिद्धे। तयोरपत्यानि क्रमशः दैतेयाः आदितेयाश्च इति लोके प्रतीतान्येव। एतयोः उभयोः अपत्यवर्गयोः सापत्न्य-दोषेण स्पर्धा सङ्घर्षश्च समजनि। एनयोर्विरोधः महानवर्धत। स च अन्योन्यविनाशं आकाङ्क्षमाणः तन्निर्वहणपर्यन्तः सम्बभूव। एवं बहुतिथे काले गते दितेरपत्ये हिरण्याक्ष–हिरण्यकशिपू इत्युदभूताम्। अमुयोरेकतरः हिरण्याक्षः अमूं भूमिं कटवेष्टनं वेष्टयित्वा प्रजाः बबाधे। वराहावतारेण श्रीहरिणा जघ्ने च।

तमुदन्तमाकर्ण्य क्रुद्धः सहोदरो हिरण्यकशिपुः 'तमरिं श्रीहरिं विजेतुं हन्तुं वा नैवैषा मम सहजा शक्तिरलम्। दैव-शक्तिरेवात्र प्रभविष्यति। नान्या।' इत्यमन्यत। तस्यै देवशक्तये ब्रह्माणमुद्दिश्य तपस्तेपे च।

तपसा तोषितो विधाताऽमुष्मै अन्यदुर्लभान् वरान् अयच्छत्। तद्दत्तैश्च वरैः दर्पितः स देवान् देवयोनीन् विद्या-धराऽदीन् नित्यं पीडयन्नास।

अमुना दैत्येन पीड्यमानाः देवाऽदयः सर्वे उद्विग्ना अभूवन्। कुत्रापि अन्यत्र शरणमनालक्ष्य वैकुण्ठं गत्वा

अशरणशरण्यं श्रियःपतिं श्रीमन्नारायणमेव विप्लुताः प्लुतैः स्तोत्रैः शरणमुपजग्मुः ।

दण्डकम् :— "श्रीमानिनीप्राणनाथ २ दयासागर २ भोगिभोगे शयान २ विहंगेशयान २ दया नास्ति वाऽस्मासु भोः । रक्षक २ तापिनां, शिक्षक २ पापिनाम् भयाऽर्तान् सुरान् मर्दितान् दानवैरार्दयाद्यैव सम्पद्य सम्मर्दयाद्यैव तानासुरान्, भासुरान् कल्पयास्मान् सतां पालक २ ते कृपाधारया वर्धयस्वाशरण्यान् शरण्य २ वरेण्य २ हरे २ ते नमस्ते नमः ।"

एवं प्रार्थयमानान् सुरान करुणयोवाचाच्युतः । "भोः सुराः । कंचित्कालममुं सहध्वम् असुरम् । सोऽयं यदा मे भक्तं स्वपुत्रं परिबाधते तदा मे वध्यो भवेत् । निश्चितमेतत् ।" इति ।

एवं भगवता आश्वसिताः देवताः निजं धामागमन् । गच्छति च काले हिरण्यकशिपोः पत्नी प्रह्लादं नाम पुत्रं असूत । अमुष्मै च महर्षिः नारदः मातुः गर्भस्थायैव श्रीहरौ भक्तिमुपदिदेश । अत एव कारणात् स बालकः निरन्तरं श्रीहरेः ध्याने अमृतह्रद इव निमग्नोऽभवत् । कुत्रचित श्रीहरिं अर्चयति । क्वचित् वन्दते, कदाचित् गायति । कुत्रचन जपति । कस्मिंश्चित् प्रदेशे ध्यायति । अन्यत्र भजमानः वयस्यान् समाहरति । एकदा श्रीहरेः कथाः

बालकेभ्य उपादिशाति। अन्यदा विष्णुं ध्यायन् आत्मानं विस्मराति। एवं निरन्तरं श्रीहरेः चरणावेव भजते।

एवं श्रीमन्नारायणे अनुरक्तममुं बालकमवलोक्य दैत्यः 'स्वविरोधिनं कीर्तयत्येष' इति धर्षयामास। क्रमशः पुत्रमनेकविधैर्दण्डैर्दण्डयामास च। तद्यथा समुद्रे न्यमज्जयत्, सर्पैरदंशयत्, पर्वताग्रेभ्यः अधोऽपातयत्, विषमपाययत्, कशाभिः अताडयत्। अस्माकं श्रीहरिः विरोधी। स तव पितृव्यं जघान। अतोऽमुं मा कीर्तय, मा स्मर वा इत्यबोधयत्। अस्मत्कुलविरोधी न भजनीय इत्युपदिदेश च।

इत्येवं रोषितोऽपि, भीषितोऽपि, अवक्रुष्टोऽपि, उपदिष्टोऽपि, बाधितोऽपि, पीडितोऽपि, ताडितोऽपि, दण्डितोऽपि खण्डितोऽपि वा प्रह्लादः श्रीहरौ भक्तिं नैव जहौ। "न हि कश्चनापि आजानसंक्रान्तं गुणं त्यक्तुं कक्नोति।"

एवमन्यान्यैरुपायैरुद्युञ्जानोऽपि दैत्यः यदा विफल एवाऽसीत् तदा 'स हरिः नास्ति, यद्यस्ति प्रदर्शय मह्यम्' इति सुतं निर्बबन्ध।

कुमारश्चोवाच 'सर्वत्रैवास्ति श्रीहरि'रिति। 'तर्हि अत्र स्तम्भे दर्शयिष्यसि वा' इत्यवक्रुष्टः पिता प्रह्लादः "सर्वत्रैव जगति विद्यमानः श्रीहरिः अत्र नास्तीति भवता कुतः शङ्क्यते? अत्र स्तम्भेऽप्यस्त्ये" वेति अवादीत्।

पिता च स्तम्भं करतलेन सावष्टम्भं प्राहरत्। तस्य प्रहारेण द्विधा दलिते स्तम्भे नरसिंहरूपेण आविर्भूतः श्रीहरिः तं हिरण्यकशिपुमवधीत्। प्रह्लादस्य वचनमिव प्रह्लादमपि श्रीहरिः पालयामास। लोकानां क्षेममपि समपादयत् श्रीनरसिंहावतारः श्रीमन्नारायणः।

### अभ्यासः

१. अर्थाः :– दुहितरः=पुत्र्यः। समजनि=उदभूत्।
अलम्=पर्याप्तम्। वराहः=सूकरः।
जघ्ने=मारितः। उदन्तः=वृत्तान्तः।
विधाता=चतुर्मुखः। जहौ=तत्याज।
धाम=स्थानम्। आर्दय=आगच्छ

२. विग्रहः – कटं + वेष्टयित्वेय=कटवेष्टनम्

३ प्रयोगव्याकरणम् :–
तेपे–तप=सन्तापे धातोः लिट्।

४. पूरयतः –
(अ) कश्यपो नाम......महर्षिः।
(आ) तयोः अपत्यानि......क्रमशः.... इति।
(इ) अमुयोः......हिरण्याक्षः।
(ई) विधाता ....अन्यदुर्लभान्..... अयच्छत्।
(उ) विप्लुताः ..... स्तोत्रैः .....उपजग्मुः।
(ऊ) मर्दितान् दानवैः..... अद्यैव।

५. प्रश्नाः :–
(अ) कश्यपः कीदृशः ?
(आ) हिरण्याक्षः कुतः किमकरोत् ?
(इ) हिरण्यकशिपुना बाधिताः के ?
(ई) देवाः श्रीहरिं कथमस्तुवन् ?
(उ) श्रीहरिः किं प्रतिशुश्राव ?

## १५. पत्रलेखनम्

हैदराबाद् नगरम्
पराभवज्येष्ठकृष्णचतुर्दशी,
बुधवासरः ।

श्रीमत्सु समादरणीयेषु पूज्यपितृपादेषु
सविनयं सहस्रशः प्रणामाः वितीर्यन्ते ।

पूज्यपादानां कृपया अहमत्र कुशली अस्मि । आशासे च श्रीमन्तः सर्वेऽपि तत्र कुशलिन इति । मातृदेव्यै अग्रजेभ्यश्च मदीयाः प्रणामाञ्जलयो निवेदनीयाः ।

अद्य विशेषसमाचारस्तु अयमस्ति यत् अहमस्मिन् वर्षे वार्षिकपरीक्षायां भवतां अस्मद्गुरुचरणानां च आशीर्वाद-बलेन प्रथमश्रेण्यां समुत्तीर्णोऽस्मि। मम विद्याऽऽलयस्य अन्येऽपि छात्राः समुत्तीर्णाः सन्ति । अस्य वर्षस्य परीक्षाफलं बहु समीचीनं वर्तते । ग्रीष्मावकाशानन्तरं पुनरप्यहं परिश्रमेण पठिष्यामि, येन अग्रिमवर्षेऽपि परीक्षायां प्रथमश्रेण्यामेव सफलो भविष्यामि ।

बहूनि दिनानि व्यतीतानि । परं श्रीमतां किमपि पत्रं न मयाऽऽसादितम् । अहमत्र भवदादेशानुसारं श्रद्धया स्वपाठ्यग्रन्थानामध्ययनं करोमि । परन्तु मम समीपे सम्प्रति

अनेकानि आवश्यकवस्तूनि न सन्ति। पाठ्यपुस्तकानि कतिचन लेखिन्यादिसामग्री च न सन्ति। खाद्यपदार्थानामप्यल्पता वर्तते। वस्त्राणि च मम प्रायेण जीर्णतां गतानि। मम सुहृदः सहाध्यायिनश्च विशेषं साहाय्यं कुर्वन्ति। अतः श्रीमद्भिः शीघ्रमेव पञ्चाशत् रूप्यकाणि प्रेषणीयानीति प्रार्थये। अहं नवरात्रावकाशे भवतां समीपमागामिष्यामि।

अनुजः चि. रामनाथशर्मा, भगिनी सरस्वती च सम्यक् पठत इति मन्ये। अनयोःकृते किञ्चित् संस्कृतपुस्तकं सरलमानेष्यामि। तावत्पर्यन्तं तौ संस्कृताध्ययनं कुर्वाताम् इति अहमनुरुन्धे। यतः, 'संस्कृतभाषा सर्वासां भारतीयभाषाणां जननी। तस्याः अध्ययनं अत्यन्तमस्माकं भारतीयानां सर्वेषामप्यावश्यकम्' इति अस्माकं गुरुपादाः अद्यैव अस्मान् उपादिशन्। 'तस्याः अध्ययनं विना भारतीयत्वमेव न सिध्येत्' इत्यपि तैरेवोक्तम्।

परमपूज्यायै मातृदेव्यै गुरुजनेभ्यश्चास्मद्गृहस्थितेभ्यः मम सभक्तिप्रणामाः निवेदनीयाः इत्यभ्यर्थये। नमांसि भूयांसि।

इति भवतामाज्ञानुसारी,

प्रियपुत्रः,

सदाशिवशर्मा।

## अभ्यासः

१. पूरयत :– अ ) मातृदेव्यै च......निवेदनीयाः

आ) अन्येऽपि छात्राः...... ।

इ ) अग्रिमवर्षेऽपि परीक्षायां......भविष्यामि ।

ई ) श्रीमद्भिः पञ्चाशत्......प्रेषणीयानि ।

२. प्रश्ना :– अ ) कस्य बलेनायं प्रथमश्रेण्यामुत्तीर्णः ?

आ) अस्य कुत्र लोपः समभवत् ?

इ ) कदा वाऽयं पितुःसमीपमागयिष्यति ?

ई ) अस्य के के बान्धवाः सन्ति ?

३. 'भू' 'गम्' धात्वोः लुटि रूपाणि प्रयुज्य पञ्च वाक्यानि विरचयत ।

## १६. नीति-श्लोकाः

### विद्या

१) विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनम्
विद्या भोगकरी यशस्सुखकरी विद्या गुरूणां गुरुः ।
विद्या बन्धुजनो विदेशगमने विद्या परा देवता
विद्या राजसुपूजिता, न हि धनं, विद्याविहीनः पशुः ॥

२) न चोरहार्यं न च राजहार्यं न भ्रातृभाज्यं न च भारकारी ।
व्यये कृते वर्धत एव नित्यं विद्याधनं सर्वधनप्रधानम् ॥

### विद्वान्

३) नाऽलम्बते दैष्टिकतां न निषीदति पौरुषे ।
शब्दार्थौ सत्कविरिव द्वयं विद्वानपेक्षते ॥

४) अन्यदुच्छृङ्खलं सत्वं अन्यच्छास्त्रानियन्त्रितम् ।
सामानाधिकरण्यं हि तेजस्तिमिरयोः कुतः ॥

५) मृदुव्यवहितं तेजो भोक्तुमर्थान् प्रकल्पते ।
प्रदीपः स्नेहमादत्ते दशयाऽभ्यन्तरस्थया ॥

६) सहसा विदधीत न क्रियामविवेकः परमापदां पदम् ।
वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः ॥

७) वारयति वर्तमानां आपदमागामिनीं च सत्सङ्गः ।
तृष्णां च हरति पीतं गङ्गाया दुर्गतिं च सद्योऽम्भः ॥

## मनस्वी

८) स जातो येन जातेन याति वंशस्समुन्नतिम् ।
परिवर्तिनि संसारे मृतः को वा न जायते ॥

९) कुसुमस्तबकस्येव द्वयी वृत्तिर्मनस्विनः ।
मूर्ध्नि वा सर्वलोकस्य शीर्यते वन एव वा ॥

१०) पादाऽहतं यदुत्थाय मूर्धानमधिरोहति ।
स्वस्थादेवापमानेऽपि देहिनस्तद्वरं रजः ॥

११) मा जीवन् यः परावज्ञादुःखदग्धोऽपि जीवति ।
तस्याजननिरेवास्तु जननीक्लेशकारिणः ॥

१२) यदचेतनोऽपि पादैः स्पृष्टः प्रज्वलति सवितुरिनकान्तः ।
तत्तेजस्वी पुरुषः परकृतनिकृतिं कथं सहते ॥

## मूढः

१३) अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः ।
ज्ञानलवदुर्विदग्धं ब्रह्माऽपि नरं न रञ्जयति ॥

## धनम्

१४) धनमार्जय काकुत्स्थ ! धनमूलमिदं जगत ।
अन्तरं नाभिजानामि निर्धनस्य मृतस्य च ॥

## दुष्टः

१५) जले तैलं खले गुह्यं पात्रे दानं मनागपि ।
प्राज्ञे शास्त्रं स्वयं याति विस्तरं वस्तु शक्तितः ॥

१६) गजे कडङ्करीये तु जारे राजनि वा पुनः ।
पापकृत्सु च विद्वत्सु नियन्ता जन्तुरत्र कः ?

१७) श्रुतं सत्यं तपश्शीलं विज्ञानं वित्तमुन्नतिम् ।
इन्धनीकुरुते मूढः प्रविश्य वृजिनानलम् ॥

१८) वृत्तं वित्तं तपः स्वान्तं स्वकुलस्यापि लाञ्छनम् ।
मरणं वा समीपस्थं कामी लोके न पश्यति ॥

१९) विश्वासघातुकाश्चैव शरणागतघातुकाः ।
वसन्ति नरके घोरे यावच्चन्द्रदिवाकरम् ।

२०) सद्भावो नास्ति वेश्यानां स्थिरता नास्ति सम्पदाम् ।
विवेको नास्ति मूर्खाणां विनाशो नास्ति कर्मणाम् ॥

२१) क्षणे तुष्टाः क्षणे रुष्टाः वितुष्टाश्च क्षणे क्षणे ।
अव्यवस्थितचित्तानां प्रसादोऽपि भयङ्करः ॥

## दैवम्

२२) अश्वप्लुतं वासवगर्जितं च स्त्रीणां च चित्तम् पुरुषस्य भाग्यम् ।
अवर्षणं चाप्यतिवर्षणं च देवो न जानाति कुतो मनुष्यः ॥

२३) वने रणे शत्रुजलाग्निमध्ये महार्णवे पर्वतमस्तके वा ।
सुप्तं प्रमत्तं विषमस्थितं वा रक्षन्ति पुण्यानि पुराकृतानि ॥

२४) यत् करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत् तपस्यासि कौन्तेय ! तत् कुरुष्व मदर्पणम् ॥

२५) भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम् ।
सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति ॥

## अभ्यासः

१. 'विद्याधनं सर्वधनप्रधानं,' कुतः ?
२. मनस्विनः वृत्तिद्वयं किम् ?
३. 'देहिनस्तद्वरं रजः,' कुतः ?
४. जननीं कुतः क्लेशयति मनस्वी ?
५. धनार्जनं कुतः कर्तव्यम् ?
६. 'नियन्ता जन्तुरत्र कः ?' कुत्र नियन्ता ?
७. मूढः वृजिनानलप्रवेशेन किं करोति ?
८. कामी किं न पश्यति ?
९. तेजस्तिमिरयोरिति किं द्वयमुपादीयते ?
१०. विदुषा किं द्वयं अपेक्ष्यते ?
११. कीदृशं तेजः भोक्तुमर्थान् प्रकल्पते ?
१२. तेजस्वी पुरुषः परकृतनिकृतिं कथं न सहते ? उदाहरत ।
१३. पुराकृतपुण्यैः को रक्ष्यते ?
१४. अव्यवस्थितचित्तता नाम कीदृशी ?
१५. किं भगवते अर्पणीयम् ?
१६. शान्तिं लब्धुं किं ज्ञेयम् ?

# १७. सुबन्ताः

प्रायशः हलन्तसाधारणशब्दाः पुं—स्त्रीलिङ्गयोः समानाः ।

१) चकारान्तः पुंलिङ्गो जलमुक्छब्दः = मेघः ।

| | | |
|---|---|---|
| जलमुक् | जलमुचौ | जलमुचः |
| हे जलमुक | हे जलमुचौ | हे जलमुचः |
| जलमुचं | जलमुचौ | जलमुचः |
| जलमुचा | जलमुग्भ्याम् | जलमुग्भिः |
| जलमुचे | जलमुग्भ्याम् | जलमुग्भ्यः |
| जलमुचः | जलमुग्भ्याम् | जलमुग्भ्यः |
| जलमुचः | जलमुचोः | जलमुचाम् |
| जलमुचि | जलमुचोः | जलमुक्षु ॥ |

२) जकारान्तः पुंलिङ्गो भिषक्छब्दः = वैद्यः ।

| | | |
|---|---|---|
| भिषक् | भिषजौ | भिषजः |
| हे भिषक् | हे भिषजौ | हे भिषजः |
| भिषजं | भिषजौ | भिषजः |
| भिषजा | भिषग्भ्याम् | भिषग्भिः |
| भिषजे | भिषग्भ्याम् | भिषग्भ्यः |
| भिषजः | भिषग्भ्याम् | भिषग्भ्यः |

| | | |
|---|---|---|
| भिषजः | भिषजोः | भिषजाम् |
| भिषजि | भिषजोः | भिषक्षु ॥ |

३) तकारन्तः पुलिङ्गो मरुच्छब्दः = वायुः ।

| | | |
|---|---|---|
| मरुत् | मरुतौ | मरुतः |
| हे मरुत् | हे मरुतौ | हे मरुतः |
| मरुतम् | मरुतौ | मरुतः |
| मरुता | मरुद्भ्याम् | मरुद्भिः |
| मरुते | मरुद्भ्याम् | मरुद्भ्यः |
| मरुतः | मरुद्भ्याम् | मरुद्भ्यः |
| मरुतः | मरुतोः | मरुताम् |
| मरुति | मरुतोः | मरुत्सु ॥ |

४) तकारान्तः पुलिङ्गः पचच्छब्दः ।

| | | |
|---|---|---|
| पचन् | पचन्तौ | पचन्तः |
| हे पचन् | हे पचन्तौ | हे पचन्तः |
| पचन्तम् | पचन्तौ | पचतः ॥ |

शेषं मरुच्छब्दवत् ।

५) तकारान्तः पुलिङ्गो महच्छब्दः ।

| | | |
|---|---|---|
| महान् | महान्तौ | महान्तः |
| हे महन् | हे महान्तौ | हे महान्तः |

| | | |
|---|---|---|
| महान्तम् | महान्तौ | महतः ॥ |

शेषं मरुच्छब्दवत् ।

६) इकारान्तनपुंसकलिङ्गः शुचिशब्दः ॥

| | | |
|---|---|---|
| शुचि | शुचिनी | शुचीनि |
| हे शुचे<br>हे शुचि | हे शुचिनी | हे शुचीनि |
| शुचि | शुचिनी | शुचीनि |
| शुचिना | शुचिभ्याम् | शुचिभिः |
| शुचिने<br>शुचये | शुचिभ्याम् | शुचिभ्यः |
| शुचिनः<br>शुचेः | शुचिभ्याम् | शुचिभ्यः |
| शुचिनः<br>शुचेः | शुचिनोः<br>शुच्योः | शुचीनाम् |
| शुचिनि<br>शुचौ | शुचिनोः<br>शुच्योः | शुचिषु ॥ |

७) उकारान्तनपुंसकलिङ्गो मृदुशब्दः ।

| | | |
|---|---|---|
| मृदु | मृदुनी | मृदूनि |
| हे मृदो<br>हे मृदु | हे मृदुनी | हे मृदूनि |

| | | |
|---|---|---|
| हे द्विट् | हे द्विषौ | हे द्विषः |
| द्विषम् | द्विषौ | द्विषः |
| द्विषा | द्विड्भ्याम् | द्विड्भिः |
| द्विषे | द्विड्भ्याम् | द्विड्भ्यः |
| द्विषः | द्विड्भ्याम् | द्विड्भ्यः |
| द्विषः | द्विषोः | द्विषाम् |
| द्विषि | द्विषोः | द्विट्त्सु<br>द्विट्सु |

१२) सकारान्तः पुंलिङ्गो वेधश्शब्दः = ब्रह्मा ।

| | | |
|---|---|---|
| वेधाः | वेधसौ | वेधसः |
| हे वेधः | हे वेधसौ | हे वेधसः |
| वेधसम् | वेधसौ | वेधसः |
| वेधसा | वेधोभ्याम् | वेधोभिः |
| वेधसे | वेधोभ्याम् | वेधोभ्यः |
| वेधसः | वेधोभ्याम् | वेधोभ्यः |
| वेधसः | वेधसोः | वेधसाम् |
| वेधसि | वेधसोः | वेधस्सु ॥ |

१३) सकारान्तः पुंलिङ्गः श्रेयश्शब्दः ।

| | | |
|---|---|---|
| श्रेयान् | श्रेयांसौ | श्रेयांसः |
| हे श्रेयः | हे श्रेयांसौ | हे श्रेयांसः |
| श्रेयांसम् | श्रेयांसौ | श्रेयसः ॥ |

शेषं वेधश्शब्दवत् ।

१४) सकारान्तः पुंलिङ्गो विद्वच्छब्दः=पण्डितः ।

| | | |
|---|---|---|
| विद्वान् | विद्वांसौ | विद्वांसः |
| हे विद्वन् | हे विद्वांसौ | हे विद्वांसः |
| विद्वांसम् | विद्वांसौ | विदुषः |
| विदुषा | विद्वद्भ्याम् | विद्वद्भिः |
| विदुषे | विद्वद्भ्याम् | विद्वद्भ्यः |
| विदुषः | विद्वद्भ्याम् | विद्वद्भ्यः |
| विदुषः | विदुषोः | विदुषाम् |
| विदुषि | विदुषोः | विद्वत्सु ॥ |

१५) रेफान्तः स्त्रीलिङ्गो गीर्शब्दः=वाक् ।

| | | |
|---|---|---|
| गीः | गिरौ | गिरः |
| हे गीः | हे गिरौ | हे गिरः |
| गिरं | गिरौ | गिरः |
| गिरा | गीर्भ्याम् | गीर्भिः |
| गिरे | गीर्भ्याम् | गीर्भ्यः |
| गिरः | गीर्भ्याम् | गीर्भ्यः |
| गिरः | गिरोः | गिराम् |
| गिरि | गिरोः | गीर्षु ॥ |

१६) शकारान्तः स्त्रीलिङ्गो दिक्छब्दः ।

| | | |
|---|---|---|
| प्र. दिक् | दिशौ | दिशः |

तृ. दिशा दिग्भ्याम् दिग्भिः
स. दिशि दिशोः दिक्षु ॥

२७) तकारान्तनपुंसकलिङ्गो दधच्छब्दः ।

प्र. दधत् दधती दधन्ति / दधति

१८) तकारान्तनपुंसकलिङ्गः तुदच्छब्दः ।

तुदत् तुदती / तुदन्ती तुदन्ति ।

१९) दकारान्तनपुंसकलिङ्गो हृच्छब्दः ।

हृत् हृदी हृन्दि ।

२०) नकारान्तनपुंसकलिङ्गो नामन् शब्दः ।

नाम नाम्नी / नामनी नामानि

हे नामन् / हे नाम हे नाम्नी / हे नामनी हे नामानि

नाम नाम्नी / नामनी नामानि

नाम्ना नामभ्याम् नामभिः
नाम्ने नामभ्याम् नामभ्यः

| | | |
|---|---|---|
| नाम्नः | नामभ्याम् | नामभ्यः |
| नाम्नः | नाम्नोः | नाम्नाम् |
| नाम्नि / नामनि | नाम्नोः | नामसु ॥ |

२१. शकारान्तनपुंसकलिङ्गस्तादृकच्छब्दः ।

| | | |
|---|---|---|
| तादृक् | तादृशी | तादृंशि |
| हे तादृक् | हे तादृशी | हे तादृंशि |
| तादृक् | तादृशी | तादृंशि |
| तादृशा | तादृग्भ्याम् | तादृग्भिः |
| तादृशे | तादृग्भ्याम् | तादृग्भ्यः |
| तादृशः | तादृग्भ्याम् | तादृग्भ्यः |
| तादृशः | तादृशोः | तादृशाम् |
| तादृशि | तादृशोः | तादृक्षु ॥ |

२२) ऋकारान्तः पुंलिङ्गो नृशब्दः ।

| | | |
|---|---|---|
| ना | नरौ | नरः |
| हे नः | हे नरौ | हे नरः |
| नरम् | नरौ | नॄन् |
| न्रा | नृभ्याम् | नृभिः |
| न्रे | नृभ्याम् | नृभ्यः |
| नुः | नृभ्याम् | नृभ्यः |

| | | |
|---|---|---|
| नुः | न्रोः | नॄणाम्<br>नृणाम् |
| नरि | न्रोः | नृषु ॥ |

२३) चकारान्तः पुंलिङ्गोऽन्वक्छब्दः ।

| | | |
|---|---|---|
| अन्वङ् | अन्वञ्चौ | अन्वञ्चः |
| अन्वञ्चम् | अन्वञ्चौ | अनूचः |
| अनूचा | अन्वग्भ्याम् | अन्वग्भिः |
| अनूचे | अन्वग्भ्याम् | अन्वग्भ्यः |
| अनूचः | अन्वग्भ्याम् | अन्वग्भ्यः |
| अनूचः | अनूचोः | अनूचाम् |
| अनूचि | अनूचोः | अन्वङ्क्षु<br>अन्वक्षु |

## १८. तिङन्ताः ।

१) एध=वृद्धौ । आत्मनेपदी ।

| | | | |
|---|---|---|---|
| लुङ् :– | ऐधिष्ट | ऐधिषाताम् | ऐधिषत |
| | ऐधिष्ठाः | ऐधिषाथाम् | ऐधिढ्वम |
| | ऐधिषि | ऐधिष्वहि | ऐधिष्महि |

२) हन=हिंसा-गत्योः । परस्मैपदी ।

| | | | |
|---|---|---|---|
| लुङ :– | अवधीत् | अवधिष्टाम् | अवधिषुः |
| | अवधीः | अवधिष्टम् | अवधिष्ट |
| | अवधिषम् | अवधिष्व | अवधिष्म |
| विधिलिङ् :– | हन्यात् | हन्याताम् | हन्युः |
| | हन्याः | हन्यातम् | हन्यात |
| | हन्याम् | हन्याव | हन्याम |

३) डुभृञ्=(धारण-पोषणयोः) परस्मैपदी ।

| | | | |
|---|---|---|---|
| लिट् :– | बभार | बभ्रतुः | बभ्रुः |
| | बभर्थ | बभ्रथुः | बभ्र |
| | बभार / बभर | बभृव | बभृम । |

४) पद=गतौ । आत्मनेपदी ।

| | | | |
|---|---|---|---|
| लिट् :– | पेदे | पेदाते | पेदिरे |

| | | |
|---|---|---|
| पेदिषे | पेदाथे | पेदिद्वे |
| पेदे | पेदिवहे | पेदिमहे |

५) हिसि=हिंसायाम् । परस्मैपदी ।

| | | | |
|---|---|---|---|
| लट् :— | हिनस्ति | हिंस्तः | हिंसति |
| | हिनस्सि | हिंस्थः | हिंस्थ |
| | हिनस्मि | हिंस्वः | हिंस्मः । |

६) तनु=विस्तारे । उभयपदी ।

लुङ् (परस्मैपद्याम्)

| | | |
|---|---|---|
| अतानीत् / अतनीत् | अतानिष्टाम / अतनिष्टाम | अतानिषुः / अतनिषुः |
| अतानीः / अतनीः | अतानिष्टम / अतनिष्टम् | अतानिष्ट / अतनिष्ट |
| अतानिषम् / अतनिषम् | अतानिष्व / अतनिष्व | अतानिष्म / अतनिष्म |

लुङ् (आत्मनेपद्याम्)

| | | |
|---|---|---|
| अतत / अतनिष्ट | अतनिषाताम् | अतानिषत |
| अतथाः / अतनिष्ठाः | अतनिषाथाम् | अतनिध्वम् |
| अतनिषि | अतनिष्वहि | अतनिष्महि |

# १९. विशेष शब्दसूची

१) अचलः
२) अन्धुः
३) अदस्
४) अम्बु
५) अष्टौ
६) अश्विन्
७) अहमहमिका
८) अदस्
९) अब्धिः
१०) आचार्यः
११) आढकाः
१२) आन्दोलनम्
१३) आदर्शः
१४) आदेशः
१५) आदिः
१६) आवश्यकी
१७) इदम्
१८) इन्धनम्
१९) उर्वी
२०) उषस्
२१) ऊर्मिः
२२) ऊर्ध्वम्
२३) ऋतुः
२४) ऋद्धिः
२५) एकः
२६) एनः
२७) ऐश्वर्यम्
२८) ऐन्द्री
२९) औरसः
३०) और्वः
३१) औदासीन्यम्
३२) करी
३३) कङ्करीयः
३४) कार्पासम्
३५) कुलुत्थाः
३६) खलः
३७) खड्गः
३८) खनिः
३९) गजः
४०) गौः
४१) गाथा
४२) घनः
४३) घातुकः
४४) घृतम्ः
४५) चणकः
४६) चोरः
४७) छाया
४८) छत्रम्
४९) जनिः
५०) जन्तुः
५१) टङ्कारः
५२) डिण्डिमः
५३) तमः
५४) तितिक्षा
५५) त्रपुः
५६) तेजः
५७) दशा
५८) दधि
५९) देही
६०) दौर्भाग्यम्
६१) धातुः
६२) धान्यम्
६३) धर्मः

६४) ध्वजः
६५) नितराम्
६६) निर्णयः
६७) निर्व्यूढः
६८) नागरिकः
६९) परिश्रमः
७०) पर्याप्तम्
७१) पयः
७२) प्रवक्ता
७३) पार्श्वः
७४) परिष्कारः
७५) प्लुतः
७६) पौरुषम्
७७) बहुतिथः
७८) बिरुदम्
७९) बृन्दम्
८०) भाजनम्
८१) भूमीश्वरः
८२) भूयः
८३) भोक्ता
८४) मतम्
८५) महान्
८६) यात्रा
८७) योजना
८८) विजयः
८९) वाटी
९०) शर्म
९१) श्रेयः
९२) सम्भावना
९३) सङ्कटः
९४) संविधानम्
९५) सदः
९६) स्पर्धा
९७) हिमवान्
९८) हयः
९९) हेम
१००) होमः

## तिङन्ताः

१) अर्द
२) अर्ह
३) कल
४) चर
५) चीञ्
६) जनी
७) दद
८) धृञ्
९) लबि
१०) सृ
११) ह्रेञ्

VERIFIED-2001

R.S. VIDYAPEETHA LIBRARY 54253 TIRUPATI

COVER PRINTED AT
THE ANDHRA PRADESH TEXTBOOK PRESS,
MINT COMPOUND, HYDERABAD.
1967